# ॥ नवमः सर्गः ॥

॥ श्रीगणेशाय नमः ॥

अथ नवमस्सर्गः प्रारभ्यते ।

इतीयमक्षिभ्रुवविभ्रमेङ्गितस्फुटामनिच्छां विवरीतुमुत्सुका ।
तदुक्तिमात्रश्रवणेच्छयाऽशृणोद्दिगीशसन्देशगिरां न गौरवात् ॥१॥

अक्षिणी च भ्रुवौ चाक्षिभ्रुवं, तस्य विशिष्टो भ्रमो, भ्रमणं विलासो वा, तदेवेङ्गितं मनोभिप्रायं सूचकचेष्टाविशेषः, तेन स्फुटां स्पष्टामनिच्छामरुचिं विवरीतुं प्रकटयितु-मुत्सुका उत्कलिकाकुला सती इयं दमयन्ती इति पूर्वोक्तं सर्वमशृणोत् । परं तस्योक्तं तदुक्तं तदुक्तमेव तदुक्तमात्रं तस्य श्रवणेच्छा तयैवाशृणोत् । न पुन- -रेव -र्दिक्पतिवाचिकानां गौरवादादरात् । नलप्रतिरूपोऽयं स्वयं वदन् अस्तीति हेतोरेव शुश्रावेत्यर्थः । अक्षिभ्रुवमित्यदन्तो निपातः ॥१॥

तदर्पितामश्रुतवद्विधाय तां दिगीशसन्देशमयीं सरस्वतीम् ।
इदं तमुर्वीतलशीतलद्युतिं जगाद वैदर्भनरेन्द्रनन्दिनी ॥२॥

भैमी तं भूचन्द्रं नलं जगाद । किं कृत्वा ? तदर्पितां तेन बलान्निहितां तां दिक्पति-सन्देशरूपां वाचं श्रुतामप्यश्रुतवत् श्रुतामिव कृत्वा । श्रुतामप्यश्रुतां कृत्वेत्यर्थः ॥२॥

मयाऽङ्ग ! पृष्टः कुलनामनी भवानमू विमुच्यैव किमन्यदुक्तवान् ।
न मह्यमत्रोत्तरधारयस्य किं ह्रियेऽपि सेयं भवतोऽधमर्णता ॥३॥

किं जगाद तदाह । अङ्ग भोः मया भवान् कुलं च नाम च कुलनामनी पृष्टः । अमू द्वे कुलनामनी विमुच्यैव भवानन्यदप्र-[174.a]-स्तुतं किमुक्तवान् । एवं सति अत्रार्थे मम उत्तरधारयस्य मत्युत्तरदानार्हस्याधमर्णत्ता गणिता ह्रियेऽपि न । यदि तावद् ऋणात् पातकं भयं नास्ति । तत् त्रपाऽप्यत्र युक्तेत्यर्थः । धारयतीति धारयः । उत्तरस्य धारय उत्तरधारः । अधमर्ण ऋणी, तस्य भावोऽधमर्णत्ता ॥३॥

अदृश्यमाना क्वचिदीक्षिता क्वचिन्ममानुयोगे भवतः सरस्वतीम् ।
क्वचित् प्रकाशां क्वचिदस्फुटार्णसं सरस्वतीं जेतुमनाः सरस्वतीम् ॥४॥

ममानुयोगे प्रश्ने क्वचित् कुलनामकथनादृश्यमाना अश्रूयमाणा । क्वचिदप्रस्तुते दिगीशसन्देशकथने ईक्ष्यमाणा विशिष्य श्रुता भवतः सरस्वती वाक् सरस्वती, सरस्वतीनाम्नीं सरस्वतीं नदीं जेतुमनाः अतिशयितुमिच्छुः । ततोऽपि

विशिष्टा भवितुमिच्छतीत्यर्थः। कीदृशीं नाम? क्वचित् कुरुक्षेत्रादौ प्रकाशां दृश्यप्रवाहाम्। क्वचिन्मरुमण्डलादौ अस्फुटमदृश्यमर्णो जलं यस्याः सा अस्फुटार्णास्तां तथा। सरस्वतीनाम्नी नदी हि कुरुक्षेत्रादौ नितान्तलक्ष्या वहति। ततश्चापलक्ष्यैव मरुमण्डलादौ वहन्ती गत्वा प्रभासक्षेत्रे जलधितटनिकटे [1]प्रकटी भवति। सरस्वती वाक् सामान्यनदी विशेषनदी ॥४॥

गिरः श्रुता एव तव श्रवःसुधाः श्लथा भवन्नाम्नि न तु श्रुतिस्पृहा।
पिपासुता शान्तिमुपैति वारिजा न जातु दुग्धान्मधुनोऽधिकादपि ॥५॥

साक्षात्कर्णामृतरूपास्ते वाचः श्रुता एवात्र कः सन्देहः। तच्छ्रवणेनैवाहमतीव परमसुखं प्राप्तेत्यर्थः। पुनस्तव नाम्नि विषये श्रुतिस्पृहा श्रवणवासना न शिथिला, अपि तु गाढतरैव। ननु चेन्मम वचनप्रपञ्चश्रवणेनैव भवत्या महान् परितोष[2]स्तन्मम नामाक्षरमात्रश्रवणाय किमित्यतीव स्पृहयसीत्याह। [3]वारिजा जलविषयिणी पिपासुता पिपासा कदाचिदपि शान्तिं न लभते। कुतः गुणैरधिकादपि दुग्धान्मधुनो वा दुग्धं मधु च स्वादुतागुणेन वारितोऽधिके। अथवाऽधिका दुग्धमधुभ्यां विशिष्टादन्यस्मादपीति व्याख्येयम्। लोकेऽप्याख्यानकं प्रसिद्धम्। पानीयस्य तृट् पानीयेनैवोपशाम्यती(ति)। वारिणि विषये जाता वारिजा ॥५॥

बिभर्ति वंशः कतमस्तमोपहं भवादृशं नायकरत्नमीदृशम्।
तमन्यसामान्यधियावमानितं त्वया महान्तं बहुमानमुत्सहे ॥६॥
-(मन्तु-)

कः प्रकृष्टो वंशोऽन्वयो भवद्रूपं नायकरत्नं पुरुषश्रेष्ठं तमोपहं पापक्षयकारि ईदृशमनुभूयमानगुणं बिभर्ति। अथ च तमोपहं तिमिरक्षयकारि नायकरत्नं तरलाख्यं रत्नं कतमो वंशो वेणुर्वहतीत्य-[174.b]-र्थान्तरं प्राकरणिकार्थप्रशंसाद्योतकम्। वंशे कस्मिन्नपि, क्वापि किल मौक्तिकानि जायन्ते। किं तेन तव प्रयोजनमित्याह। तं वंशमन्यैः [4]सामान्यजातिमात्रमुपादाय या धीर्बुद्धिस्तयाऽवमानितं परिभूतं सन्तं त्वया कृत्वा महान्तमुत्कृष्टं विशिष्टमत एव बहुमन्तुं, बहुमानपात्रीकर्तुमुत्सहे, उद्यमं [5]करोति। न हि तथा गुणविशिष्टस्य सामान्यचेष्टया बहुमानः कर्तुं शक्यते। अतस्तत्रोत्सहे। धन्यः स कोऽप्यन्वयः स च वेणुर्यत्र भवान्नायकरत्नं समुद्भूतो यत्र च तन्मौक्तिकं नायकरत्नभूतं समुद्भवति ॥६॥

1. B. प्रभवति. 2. B. तदा न - 3. B. om. वारिजा --- न लभते. 4. B समाना - 5. B. करोमि.

इतीरयित्वा विरतां पुनः स तामथानुजग्राह गिरा नराधिपः ।
विरुत्य विश्रान्तवतीं तपात्यये घनाघनश्चातकमण्डलीमिव ॥७॥

इत्थमभिधाय निवृत्तां तां भैमीं स, नलो वाचा कृत्वाऽनुगृहीतवान् । तदा हि तद्वचनानि तस्या महाननुग्रहः । क इव कां कामित्याह । वाशित्वा निवृत्तां सारङ्ग-श्रेणीं वर्षाप्रवेशे समुन्नतस्तोयद इव । एतेनोपमानेन तस्यास्तदेकशरणायास्तद्वाचः-श्रवणेन सञ्जीवनलाभा परमा निवृत्तिर्व्यज्यते । चातकवधूमिति वक्तव्ये चातक-मण्डलीमिति निर्देशस्य रहस्यं श्रीमान् कविरेव वेद ॥७॥

अये ! ममोदासितमेव जिह्वया द्वयेऽपि तस्मिन्ननतिप्रयोजने ।
गरौ गिरः पल्लवनार्थलाघवे मितं च सारं च वचो हि वाग्मिता ॥८॥

अये ! इत्युपालम्भगर्भे कोमलामन्त्रणे । भो दमयन्ति ! अनतिप्रयोजने सर्वथा निरर्थकम् । तस्मिन् द्वयेऽपि कुलनामनिवेदनलक्षणेऽर्थे विचार्यमाणे जिह्वाशब्दस्यैवात्र प्रयोगो युक्तो, न तु विशेषद्योतकयो रसज्ञारसनाशब्दयोः ननु किमिति तन्न युज्यत इत्याह । यतः गिरो वाचः पल्लवनं प्रपञ्चनमर्थस्याभिधेयस्य लाघवमल्पीयस्त्वमेतद् द्वयं गरौ ~~विषय~~ विषद्वयम् । यद् वचो मितं च स्तोकं च सारं च महार्थं च वाग्मिता वाचो युक्तिपटुता सैव । स एव खलु वक्ता योऽल्पैरेवाक्षरैर्भूयांसमर्थं प्रदर्शयति ॥८॥

वृथा कथेयं मयि वर्णपद्धतिः कयानुपूर्व्या समकेति केति च ।
क्षमे समक्षव्यवहारमावयोः पदे विधातुं खलु युष्मदस्मदी ॥९॥

नामकथनस्यात्रानुपयोगित्वं तावद्दर्शयति । इतीयं कथा एतत् कथनं वृथा निष्प्रयोज-नमेव इति । कथमित्याह । मयि विषये वर्णानामक्षराणां पद्धतिर्विरचना कयानुपूर्व्या कया परिपाट्या समकेति संकेतितास्ति । का च सेति भवन्नाम्नि किमक्षरं प्रथमं द्वितीयं तृतीयं वा तत् समुदाये सति [175·व] सा का भवेदिति । कदर्थयितुं न युक्तमेव । अर्थात् तव । खलु यस्मादावयोस्तव च मम च समक्षव्यवहारं, प्रत्यक्षं व्यवहरणं कार्यप्रवर्तनं युष्मदस्मदी एव पदे विधातुं क्षमे स्तः । युष्मदस्मदी इति युष्मदस्मच्छब्दनिष्पन्ने पदे त्वमहंप्रभृतिके इत्यर्थः ॥९॥

यदि स्वभावान्मम नोज्ज्वलं कुलं ततस्तदुद्भावनमौचिती कुतः ।
अथावदातं तदहो विडम्बना तथा कथा प्रेष्यतयोपसेदुषः ॥१०॥

(था)
इति प्रतीत्यैव मयावधीरिते तथापि निर्बन्धरसो न शोभते ।
हरित्पतीनां प्रतिवाचिकं प्रति क्षमो गिरां ते धरते हि सम्प्रति ॥११॥.

हे भैमि ! एवं निश्चित्यैव मयोपेक्षितेऽर्थे तथापि निर्बन्धरसो दृढप्रवृत्तिव्यसनिता न भाति । नैवायमर्थो रुचिरः खलु दृश्यते हि स्फुटं दिगीशानां प्रतिसन्देशं प्रति प्रति-सन्देशविषये तथापि गिरां क्षमो धरते उपपद्यते । एतावान् वचनक्रमस्तत्रैव विधीयतामित्यर्थः ॥११॥

तथापि निर्बध्नति ! तेऽथवा स्पृहामिहानुरुन्धे मितया न किं गिरा ।
हिमांशुवंशस्य करीरमेव मां निशम्य किं नासि फलेग्रहिर्ग्रहा ॥१२॥

हे तथापि निर्बध्नति ! एवमपि हठैकनिष्ठे इहार्थे तथा तादृशीं स्पृहां मितया गिरा किं नानुरुन्धे, किं नानुवर्ते, अपि तु तथा भवतु तव वचनं किं वचनमात्रेण न करोमीति लोकाश्रयणेन काकुगर्भं वचनम् । हिमांशुवंशस्य सोमान्वयस्य करीर-मपत्यकमेव मां श्रुत्वा किं फलेग्रहिर्ग्रहा नासि । फलवन्निर्बन्धा भवसीत्यपि लोकोक्तिः । चन्द्रवंशजं मां ज्ञात्वा त्वमपि कृतकृत्या भवेत्यर्थः । निर्बध्नात्या गृह्णातीति निर्बध्नती तस्याः सम्बोधनं निर्बध्नति । अनुरोधोऽनुवर्तनम् । फलवांस्तु फलेग्रहिः । वंश इव वंशोऽन्वयः । करीरं वंशाङ्कुरः । करीरमिव करीरमपत्यकमेव तत्त्वतोऽत्र । हे निर्बध्नति ! तथापि यद्यपि पूर्वोक्तौ न युज्यते तथास्मिन्नर्थे स्पृहामिति वा व्याख्येयम् ॥१२

महाजनाचारपरम्परेदृशी [175-7] स्वनाम नामाददते न साधवः ।
अतोऽभिधातुं न तदुत्सहे पुनर्जनः किलाचारमुचं विगायति ॥१३॥

साधुलोकस्य यो व्यवहारस्तस्यायं प्रवाहो यत्सन्तः स्वं नामाख्यां नाम प्रकाशमेव न गृह्णन्ति व्याजान्तरेण किं न गृह्णन्तु मुख्यतया निजनामग्रहणं महात्मानः कथमपि न कुर्वन्तीत्यर्थः । अतो हेतोस्तत् स्वं नाम वक्तुं न शक्नोमि । किल यस्मात् व्यवहारा-न्निवर्तिनं पुरुषं जनः सर्वोऽपि लोको गर्हते ॥१३॥

अदोऽयमालप्य शिखीव शारदो बभूव तूष्णीमहितापकारकः ।
अथास्य राजस्य दधौ पदे पदे वचांसि हंसीव ~~विदर्भ~~ विदर्भजादरे ॥१४॥

अयं नलः अद[1] एतदालप्याभाष्य तूष्णीं बभूव, मौनमकरोत् । कीदृशः ? अहितानामराती-नामपकारकोऽपकर्ता इति तत्र कन्यान्तःपुरे निर्भयस्थितिसूचनपरम् । अन्यथैतद् –

1. B. – धरकर्ता

विशेषणमत्र निरुपयुक्तं स्यात्। स्वरूपकथनमात्रं वा। श्लेषवैचित्र्यार्थम्। पुनः कीदृशः? शारदः। शारदा भगवती वागधिष्ठात्री, तत्र भक्तिरस्यासौ शारद इत्यनेनालपने हेतुरुक्तः न हि सरस्वतीभक्तं विहायान्यः कश्चन तथा सर्वपथीनं वक्तुं प्रगल्भते। क इव? शिखीव, यथा बर्ही तूष्णीं भवति। सोऽपि शारदः शरदृतुसंबन्धी। यथा स स्तोक-मालप्य निवर्तत इत्यर्थः। सोऽप्यहीनां सर्पाणां तापस्य भयज्वरस्य कारको भुजङ्ग-भुक्त्वा[1]। अथ विदर्भजा वचांस्याददे, भैमी वक्तुं प्रारेभे। कीदृशी, पदे पदे प्रति-वाक्यैकदेशमस्य नलस्य यो रागः श्रवणरसस्तस्य दृधा, धारयित्री। केव। हंसीव। यथा हंसी वचांस्याददे। साऽपि शारदीति विशेषणं ज्ञेयं शरदि, तस्याः स्वरसौष्ठव-स्याधिक्यार्थम्। दमयन्त्यास्त्वावृत्त्या विशेषणमिदम्। न हि शारदाभक्तिं विना स्त्रिया-स्तादृशी वक्तृत्वशक्तिर्भवति। कीदृशी हंसी। पदे पदे द्वयोश्चरणयोः आस्यरागस्य[2] मुखलौहित्यस्य दृधा धारिका। यो हि तस्या मुखे विद्रुमरागः स एव चरणयोरस्तीति ॥१४॥

सुधांशुवंशाभरणं भवानिति श्रुतेऽपि नापैति[3] विशेषसंशयः।

कियत्सु मौनं विततां कियत्सु वाङ्महत्यहो वञ्चनचातुरी तव ॥१५॥

त्वं सोमान्वयभूषणमेवं सामान्येन निशमितेऽपि विशेषे विभेदे संशयो विच्छिद्यति। तत्र ईदृशाः सत्पुरुषा बहवः सन्ति। तन्मध्ये को भवानिति निश्चयेऽद्यापि मम सन्देह एव देहदाहकृदित्यर्थः। अहो! ते गरीयसी विप्रलम्भनवैदग्धी। यतः कियत्सु विषये मौनं ततम्। कुलनामादि हि सम्यग् नोक्तम्। [178.a] कियत्सु दिगीशसन्देशेषु गीः प्रसारिता। अन्यो वञ्चनचतुर ईदृगेव भवति। कियत्सु मौनं ततेति वा व्याख्येयम् ॥१५॥

मयापि देयं प्रतिवाचिकं न ते स्वनाम मत्कर्णसुधामकुर्वते।

परेण पुंसा हि ममापि संकथा कुलाबलाचारसहासनासहा ॥१६॥

हे साधो! मयापि तव [तुभ्यं] प्रतिसन्देशो न देयः। किं कुर्वते। निजाभिधानं मत्कर्णा-मृतमसम्पादयते। हि यतः ममापि परेण पुंसा नलादन्येन पुरुषेण सह संकथा समा-लपनपरम्परा कुलाबलानां कुलस्त्रीणामाचारो धर्मस्तेन सहासनमेकत्रावस्थितिस्तन्न सहते या सा तथा। एवं व्यवहरणं कुलस्त्रीधर्मश्च द्वयोरेकत्र स्थितिर्नास्तीत्यर्थः। परेण पुंसेति लोकोक्तिसमाश्रयणमार्गेण। तस्या हि प्रसिद्धः पूर्वपुरुषो नास्त्यसौ यदपेक्षया परः-सम्भवेत्। नलस्तु मनःस्थो वर्तते, तदपेक्षया व्याख्यातमेव ॥१६॥

1. B1 – भुक्त्वात्. 2. B – – स्व – – 3. B1 नापिति.

इत्यभिनन्द्य प्रतिबन्धबन्धुरः प्रियागिरः सस्मितमाह स स्म ताम्।
वदामि वामाक्षि! परेषु मा क्षिप त्वमीदृशं माक्षिकमाक्षिपद्वचः ॥१७॥

स नलः प्रतिबन्ध्यां प्रतिवचनग्रहेऽनुत्तरोऽप्रीतिकारः[1] सन् प्रियाया गिरो हृदा चित्तेना-भिनन्द्य स्तुत्वा प्रियामाह स्म। किमब्रवीदित्याह। हे वामाक्षि! वदामि। ईदृशं माक्षिकं मिषं क्षौद्रमाक्षिपत्, निन्दत्। रथं वचः परेषु अन्येषु मा क्षिप, मा निधेहि। मयि विषये क्षिपति। अर्थादन्येषु पुरुषेषु विषये, यदि तव श्रोतुमिच्छा नास्ति, तर्हि तेषु मा क्षिप, यदपेक्षया त्वया परेण पुंसा संकथेत्युक्तं तस्मिन् मयि[2] क्षिपेत्यर्थः। 'वदामि' इति सामान्योपक्रमे दूषणे प्रतिदूषणोद्भावनं प्रतिबन्दी। अन्यच्चैवं - "गृहीते वादिना वाक्ये तद्वाक्यग्रहणं तु यत्। प्रतिबन्दीति सा प्रोक्ता विचारक्रमकोविदैः"। प्रतिबन्दीव प्रतिबन्दी ग्राहके प्रतिग्राहक इत्यर्थः ॥१७॥

करोषि नेमं[3] फलिनं मम[4] श्रमं दिशोऽनुगृह्णासि[5] न कञ्चन प्रभुम्।
त्वमित्थमर्हासि सुरानुपासितुं रसामृतस्नानपवित्रया गिरा ॥१८॥

भैमि! इमं मम श्रमं फलितं फलवन्तं करोषि न। कञ्चन दिशः प्रभुं दिगीशमनु-गृह्णासि न, प्रसादपात्रतां नयसि नेति काक्वा निषेधद्वयं विधावेव। इत्थमेवं रसः स्वादुता गुण एवामृतं तत्र स्नानं, तेन पवित्रया गिरा कृत्वा, सुरान् देवानुपासितुं त्वमर्हासि। रसनीयत्वाद्रसः। फलवान् फलिनः फली ॥१८॥

सुरेषु सन्देशयसीदृशीं बहुं रसस्रवेण स्तिमितां न भारतीम्।
मदर्पिता दर्पकतापितेषु या प्रयाति दावार्दित~~स्व~~तय-[176 b]-वृष्टिताम् ॥१९॥

त्वमीदृशीं बहुमधिकां रसस्य स्वादुतालक्षणस्य स्रवेण द्रवेण स्तिमितामार्द्रां भारतीं वाचं सुरेषु विषये सन्देशयसि, न सन्देशं करोषि। नेति काक्वा निषेधो विधौ। मदर्पिता निहिता सती, य का भारती, तेषु दर्पकेण कन्दर्पेण तापितेषु विषये दावेन वनवह्निना-र्दितो बाधितो दावो यो वनं तत्र या वृष्टिस्तस्ता तां प्रयाति। तेषां बहुत्वाद् वन-मुपमानम्। यथा - दावानलकीलकवलितं काननं नवघनार्पितया वृष्ट्या परां निर्वृतिमा-याति। यामासाद्य देवास्तथैव निर्वृता भवन्तीत्यर्थः। दवौ दावौ वनारण्यवह्नी वह्नेऽपि[6] (वनेऽपि) इत्यमरः ॥१९॥

यथा यथेह त्वदुपेक्षयानया निमेषमप्येष जनो विलम्बते।
रुषा शरव्यीकरणे दिवौकसां तथा तथार्थं त्वरते रतेः पतिः ॥२०॥

1. B1. -प्रतीकारः 2. B1. -चि. 3. B1. नेनं, 4. B1. सम. 5. B1. -मि. 6. B1. वह्नौ.

यथा यथाऽनेन भवदनादरेण एष मल्लक्षणो जन इह त्वत्समीपे निमेषमात्रमपि कालं क्षिपति तथा तथाऽयं रतेः पतिः कामः कोपेन कृत्वा सुराणां लक्ष्यतानयने ससम्भ्रमो भवति। अशरव्याणां शरव्याणां करणं, शरव्यीकरणम्। तेषु दृष्टस्य कष्टस्य रतिपतेः तान् शरव्यीकुर्वत इव नोपलभ्यमानत्वादयमिति प्रत्यक्षतया निर्देशो विहितः प्रत्यक्षव्यवहार एव ईदृशा निर्देशः स्यात्। तथा च - "इदमः प्रत्यक्ष-कृतं समीपतरवर्ति चैतदोरूपमदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयात्" ॥२०॥

इयच्चिरस्यावदधन्ति मत्पथे किमिन्द्रनेत्राण्यशनिर्न निर्ममौ।
धिगस्तु मां सत्वरकार्यमन्थरं स्थितः परप्रेष्यगुणोऽपि यत्र न ॥२१॥

इन्द्रस्य नेत्राणि किमशनिर्न निर्ममौ। अपि तु, जानामि वज्रमेव तान्यारेभे। मम पन्था मत्पथस्तस्मिन्नियच्चिरस्यावदधन्ति। एतावन्तं कालमवधानपराणि एकाग्राणी-त्यर्थः। लोकोक्तिरियम्। - मां धिगस्तु निन्द्योऽहम्। कीदृशम्? सत्वरे त्वराकर्तव्ये कार्ये मन्थरं[1] मन्दं यत्र मयि परप्रेष्यस्य यो गुण, उपकारको धर्मः, सोऽपि न स्थिरो दृढः। अन्यो महान् गुणस्तावद्दूरे तिष्ठतु। परेषां प्रेष्यो नियोज्यस्तस्यापि यो गुणः स्वपरोपकारहेतुः, सोऽपि निश्चितो मयि नास्तीत्यर्थः। जातिरलङ्कृतिः ॥२१॥

इदं निगद्य क्षितिभर्तरि स्थिते तयाभ्यधायि स्वगतं विदग्धया।
अधिस्त्रि तं दूतयतां भुवः स्मरं मनो दधत्या नयनैपुणव्यये ॥२२॥

एतदुक्त्वा राज्ञि निवृत्ते सति, तया चतुरया आत्मगतमुक्तं[2] मनो मध्य एव प्रोक्तमित्यर्थः। किं कुर्वत्या? अधिस्त्रि स्त्रीरत्नविष-[177·a]-ये तं पृथ्वीमन्मथं जनं दूतं कुर्वतां[3] (कुर्वन्ति), देवानां नयनैपुणव्यये नीतिकौशल्याभावे निजं मनः स्थापयन्त्या। नूनं ते नीतेर्लेशमपि न विदन्तीति मनसा तानेवं निश्चिन्वत्येत्यर्थः। एवं सति यद्दूषणं तत्प्रसिद्धमेव। दूतं करोति दूतयति ॥२२॥

जडाधिपस्त्वामदिशन्मयि ध्रुवं परेतराजः प्रणिधाय स स्फुरम्।
मरुत्वतैव प्रहितोऽसि निश्चितं नियोजितश्चोर्ध्वमुखेन तेजसा ॥२३॥

ध्रुवं स जडानां मूर्खाणामधिपोऽग्रणीः[4] मयि विषये त्वामदिशद्दिदेश इति जल-वाचकस्य जडशब्दस्य छलेनार्थः। स्फुटं परेतानां मृतानां राजा परेतराजोऽत्यन्त-प्रेतस्त्वां प्राहिणोत्। मृत एव तावत् किञ्चिन्न जानाति तेषां राजा ततो विशिष्टः किमुच्यते।

---

1. B1. न परं; 2. B1. आत्मन मध्य एव, 3. B1. कुर्वतं, ४. कुर्वन्ति. 4. B1. -धिको.

तत्त्वतस्तु परेतानामदेवयोनयो ये मरणानन्तरं देहान्तरं प्राप्तास्तेषां राजा स्वामीति सेव्यसेवकभावनिरासोऽर्थं परेतराजशब्दो यमे। निश्चितं मरुत्त्वतैव प्रहितोऽसि। मरुद् वातो बाहुल्येन विद्यते यस्यासौ मरुत्वान् वातिकः वातुलः। वातुलो ह्यनिश्चितज्ञानो भवति। तत्त्ववृत्त्या तु मरुतो देवा विद्यन्ते यस्यासौ मरुत्वानिन्द्रः। निश्चितमिति काकाक्षिगोलकन्यायेनोभयत्र संबध्यते। छलार्थो यथायथं सङ्गमनीयः। अर्थ-विकल्पनया वचनविघातश्छलम् ॥२३॥

अथ प्रकाशं निभृतस्मिता स्मती सतीकुलस्याभरणं किमप्यसौ।
पुनस्तदाभाषणविभ्रमोन्मुखं मुखं विदर्भाधिपसम्भवा दधे ॥२४॥

अथासौ भैमी पुनर्नलालापविलासोद्यतं मुखं दधे। कथम्? प्रकाशं प्रकटम्। पूर्वो ह्यर्थो मनोमध्य एवाभिहितः। कीदृशी सती। निभृतं स्मितं यस्याः सा तथा गूढ-हास्येत्यर्थः। या किमित्याह। या किमप्यनिर्वचनीयं साध्वीवृन्दस्य पतिव्रतावंशस्य वा भूषणमिति विकारकरणस्याप्यभावो दर्शितः ॥२४॥

वृथापरीहास इति प्रगल्भता न नेति च त्वादृशि वाग्विगर्हणा।
भवत्यवज्ञा च भवत्यनुत्तरादतः प्रदित्सुः प्रतिवाचमस्मि ते ॥२५॥

हे सौम्य! त्वादृशि पुरुषे प्रगल्भता इति भवति। इति किम्? वृथापरीहास इति। धाष्टर्यं क्रियमाणं त्वयि वृथापरीहासत्वेन परिणमति। प्रगल्भतानुद्यते परी-हासस्तु विधेयः। न नेति च वाक् त्वादृशि पुंसि विगर्हणा निन्दा निषेधोऽप्यतितरां त्वयि क्रियमाणो निन्दा भवति। त्वयि विषयेऽनुत्तरादवज्ञा भवतीति सर्वत्र संब-ध्यते। अतो हेतुभयादहं ते तव तुभ्यं वा उत्तरं दातुमिच्छुरस्मि ॥२५॥

कथं नु तेषां कृपयापि वागसावसावि मानुष्यकलाञ्छने [।ना७७ ८]ने जने।
स्वभावभक्तिप्रवणं प्रतीश्वराः कया न वाचा मुहुमुद्रिरन्ति वा ॥२६॥

नु भोः कृपयाऽपि मनुष्यत्वदूषणे जने मल्लक्षणे तेषां देवानामसौ वाक्कथमसावि कथं सूता। कृपातिरेकादपि मयि मनुष्यकीटिकायामेवं तेषां न वक्तुं युक्तमित्यर्थः। अथवा सहजसेवाप्रसक्तजनं प्रति प्रभवः कया गिरा कृत्वा प्रीतिं न दर्शयन्ति। यद् वक्तुं नार्ह भक्तानुरञ्जनाय तदपि पूज्याः समुपन्यस्यन्तीत्यर्थः ॥२६॥

अहो महेन्द्रस्य कथं मयौचिती सुराङ्गनासङ्गमशोभिता भृतः।
द्रुतस्य हंसावलिमांसलश्रियो बलाकयेव प्रबला विडम्बना ॥२७॥

अहो चित्र! मया कृत्वा महेन्द्रस्य प्रबला विडम्बना समधिक उपहास: कथमौचित्ती। अपि तु तदसाम्प्रतमेव। कीदृशस्य? सुराङ्गनानां सङ्गमेन शोभत इत्येवंशीलस्तस्य भावस्तत्ता, तां बिभर्ति यस्तस्य। कस्येव, कीदृशस्य, कया इव? । मरालपङ्क्तिसमुपचितशोभस्यागाधजलाशयस्य बलाकया बकैरवधूटिकयेव ॥२७॥

पुरः सुरीणां भण केव मानवी न यत्र तास्तत्र तु सापि शोभिका।
अकाञ्चनेऽकिञ्चननायिकाङ्के किमारकूटाभरणेन न श्रियः ॥२८॥

वद देवाङ्गनानां पुरो मानुषी कीदृशी। अपि तु तत्पुरः सा न किञ्चिदेव। यत्र ताः सूर्यो नयः स्युस्तत्र भूमौ सापि मानुष्यपि शोभिका स्तोकमिव शोभापात्रं भवति। पश्य अकिञ्चनो दरिद्रस्तस्य नायिकाया अङ्केऽनुकम्पितेऽङ्के, आरकूटाभरणेन पित्तलालङ्कारेण किं श्रियो न भवन्ति। अपि तु तस्याः पित्तलघटितैरपि कटकादिभिर्भूयसी शोभा नैकट्यं भजते ॥२८॥

यथा तथा नाम गिरः किरन्तु ते श्रुती पुनर्मे बधिरे तदक्षरे।
पृषत्किशोरी कुरुतामसङ्गतां कथं मनोवृत्तिमपि द्विपाधिपे ॥२९॥

नाम भोः ते देवा यथा तथा यादृशीस्तादृशीर्गिरः किरन्तु विक्षिपन्तु। तासां गिरामेकस्मिन्नप्यक्षरे पुनर्मम द्वे अपि श्रुती बधिरे द्वाभ्यामपि कर्णाभ्यां तद् गिरामेकमप्यक्षरं नाहं शृणोमीत्यर्थः। पश्य। पृषत्किशोरी मृगपृष्ठौ ही गजेन्द्रे असङ्गतामसंघटमानां मनसोऽपि वृत्तिं कथं कुरुतां काक्वा सर्वथा तदर्थस्य निषेधः पृषद्धरिणभेदस्तस्य किशोरी बाला पुत्री ॥२९॥

अहो निगद्यैव नतास्यया तया श्रुतौ लगित्वाभिहितालिरालपत्।
प्रविश्य यन्मे हृदयं ह्रियाह तद्विनिर्यदाकर्णय मन्मुखाध्वना ॥३०॥

अथ आलिः सखी आलपत्। कीदृशी? । तया भैम्या श्रुतौ कर्णे लगित्वाभिहि-[ताद्य?]-ता उक्ता। कीदृश्या तयेत्याह। अद[1] एतावदेव निगद्य नतास्यया। एतावन्मात्रमुक्त्वैव नम्रवदनया। विश्वस्तया मम रहस्यं निवेदितमस्ति तदेवाहं कथयिष्यामीत्यर्थः। हृदयं मनः प्रविश्येति उपचारवृत्तिमृत्तिः ॥३०॥

बिभेमि चिन्तामपि कर्तुमीदृशीं चिराय चित्तार्पितनैषधेश्वरा।
मृणालतन्तुच्छिदुरा सतीस्थितिर्लवादपि त्रुट्यति चापलात्किल ॥३१॥

1. ऋ॰ अत एव देव॰

बहुकालं मनः स्थापितवतस्त्वाऽहमीदृशीं चिन्तामपि कर्तुं बिभेमि। किन्तु यस्मात् लवमात्रादपि चापलात् सतीस्थितिः साध्वीधर्मधुरा त्रुट्यति। यतः कीदृशी? मृणालतन्तुवच्छिदुरा त्रुटनशीला। चापलं स्थितिप्रतियोगि। छिद्यत इत्येवंशीला छिदुरा। अन्यदपि भृशं सुकुमारं चापलात् त्रुट्यति। मृणालमार्दवं प्रसिद्धमेव ॥३१॥

ममाशयः स्वप्नदशास्वपि वा नलं विलङ्घ्येतरमस्पृशद्यदि।
कुतः पुनस्तत्र समस्तसाक्षिणी निजैव बुद्धिर्विबुधैर्न पृच्छ्यते ॥३२॥

अथ मम मनोभावः स्वप्नावस्थायां अध्यादेशान्नलमतिक्रम्य[1] यद्यन्यमस्पृशत्। तदर्थे समेस्तस्य विचेष्टितस्योपद्रष्ट्री स्वकीयेव मतिर्देवैः किं न पृच्छ्यते। अथ चान्येषामपि। विबुधानां पण्डितानां बुद्धिः सर्वं पश्यति। स्वप्नदशा चाप्यगमानमपि धरयति। स्वप्नदशाकृतमगम्य[2]गमनादि न दोषायापि तु[3], गुणायेत्यपि स्थिते मम मनस्तत्रापि[4] नलं विलङ्घ्यान्यं न स्पृशति। अधिकपरिचयस्य का कथेत्यर्थः ॥३२॥

अपि स्वमस्वप्नमसूषुपन्नमी परस्य दाराननवैतुमेव[5] माम्।
स्वयं दुरध्वार्णवनाविकाः कथं स्पृशन्तु विज्ञाय तथापि तादृशीम् ॥३३॥

अथवा अमी देवाः स्वप्नरहितमप्यात्मानं स्वापयन्ति स्म। किं कर्तुम्। मामेव परस्य दारान् कलत्रमनवैतुमज्ञातुमेव। ते ह्यस्वप्ना यौगिकेन नाम्ना एतदर्थमेव सुप्ताः तथाप्येवमपि सति तादृशीं सतीं मां परदारतां गतां विज्ञाय बुद्ध्वैव कथं स्पृशन्तु। ते च कीदृशाः? स्वयमात्मना दुष्पथपाथोधि[6]कर्णधाराः परदारस्पर्शे महत् पातकमित्यन्येभ्यः समुपदिशन्ति ये ते कथमात्मना तदेव कुर्वन्त्वित्यर्थः। स्वयं कथं स्पृशन्तु इति वान्वयः ॥३३॥

अनुग्रहः केवल एव मादृशे मनुष्यजन्मन्यपि यन्मनो जने।
स चेद्विधेयस्तदमी तमेव मे प्रसद्य भिक्षां वितरीतुमीशताम् ॥३४॥

मादृशे मनुष्यजन्मन्यपि यन्नैषां मन एव[7] केवल एकोऽनुग्रहः प्रसाद एव चेद्यदि सोऽनुग्रहो विधेयोऽवश्यं कर्तव्यस्ततः इमे देवाः प्रसादं कृत्वा तमेव नलं मे मह्यं भिक्षां वितरीतुमीशतां[8] समर्था[9] भवन्तु। [174 b] शक्ता भूत्वा नलभिक्षां मह्यं वितरन्त्वित्यर्थः ॥३४॥

---

1. B1. om. -मतिक्राम्य ---- अथ च. 2. B. गमनादि. 3. B1. om. तु --- मनः 4. B1. तथापि. 5. B1. -मन-, B. -मनु- 6. B. विकीर्ण-. 7. B. एष. 8. B. -मीदतां. 9. B. समज्ञा.

अपि द्वितीयः शृणु मत्प्रतिश्रुतं स पीडयेत् पाणिमिमं न चेन्नृपः।

हुताशनोद्बन्धनवापिकारितां निजायुषस्तत्करवै स्ववैरिताम् ॥३५॥

अपि ~~अन्य~~ अन्यच्च मम दृढतरमङ्गीकृतं शृणु। इमं मम पाणिं यदि स नृपो न पीडयेत्, न गृह्णीयात्, स चेन्मां न विवाहयेदित्यर्थः। तदा निजायुषः स्ववैरितां करवै। स्वमात्मा वैरी यस्य, तस्य भावः ~~स्व~~ स्ववैरिता, ताम्। निजायुषोऽहमेव शत्रुतां भजामीत्यर्थः। उद्बन्धनं वृक्षशाखादौ बन्धनपुरःसरमवलम्बनम् ॥३५॥

निषिद्धमप्याचरणीयमापदि क्रिया सती नावति यत्र सर्वथा।

घनाम्बुना राजपथेऽतिपिच्छिले[1] क्वचिद्बुधैरप्यपथेन गम्यते ॥३६॥

ननु निजघातोऽतीवपातकहेतुत्वात् सर्वत्र निषिद्धस्तत्कथं भवती तं चिकीर्षतीत्याह। यत्र यस्यामापदि सती क्रिया साध्वाचरणं सर्वथा नावति, न रक्षति। तत्र विरुद्ध-मसदप्याचरणीयं, तथा हि मेघजलेन राजमार्गेऽतिपिच्छिले भृशविजिले कर्दमिले सति क्वचिदपि बुधैः पण्डितैरप्यपथेन गम्यते। इत्यपशब्दस्य च्छलेनार्थः। अप-शब्देन उन्मार्गेण निषिद्धोऽप्याचार उच्यते। आपद्धर्मस्तु सर्वजनविदित एवास्ति ॥३६॥

स्त्रिया मया वाग्मिषु तेषु शक्यते न जातु सम्यग्वितरीतुमुत्तरम्[2]।

तदत्र मद्भाषितसूत्रपद्धतौ प्रबन्धृतास्तु प्रतिबन्धृता न ते ॥३७॥

मया नार्या स्वभावमुग्धया तेषु वाग्मिषु वाचो युक्तिपटुषु विबुधेषु कदाचिद् यथोक्तं प्रतिवाक्यं दातुं न पार्यते। अतो हेतोः अत्रास्यां मद्भाषितमेव सूत्रं तस्य पद्धतिः संक्षिप्तावृत्तिस्तत्र[3] ते प्रबन्धृता प्रबन्धकर्तृताऽस्तु न पुनः प्रतिबन्धृता विरोधिता सूत्राणां वृत्तौ हि विद्वांसस्तदर्थमेव समादधतः सन्तः पञ्जिकां कुर्वते, न तु तदर्थं विरोधितयाऽन्यथैव विसंस्थुलयन्तः एवमेव ममासमञ्जसमपि वचनं तत्र समञ्जसं कृत्वा त्वया निवेदनीयमित्यर्थः। सूत्रपद्धतौ प्रबन्धृतापद्धति-कर्तृत्वमेव वा। प्रबध्नातीति प्रबन्धा पद्धतेर्विरचयिता[4] ॥३७॥

निरस्य दूतः स तथा विसर्जितः प्रियोक्तिरप्याह कटूष्णमक्षरम्।

*कुतूहलेनैव मुहुः कुहूरवं विडम्ब्य डिम्भेन पिकः प्रकोपितः ॥३८॥

तथा निराकृत्य दूतः प्रेषितः सन् मधुरवचनोऽपि कटूष्णमक्षरं तारकर्कशस्वरं ब्रूते। एतच्च लोके प्रत्यक्षमेव ॥३८॥

---

1. B1, D. राजपथे हि. 2. B1. वितरीतुम्. 3. B1. -स्तत्र. 4. D. रचयित्वा.

* For reading कुतूहलेनैव ---प्रकोपितः।- comm. is silent.

अहो मनस्त्वामनु तेऽपि तन्वते त्वमप्यमीभ्यो विमुखीति कौतुकम् ।
क्व वा निधिर्निर्धनमेत्यकिञ्चनं[1] स वा कवाटं घटयन्निरस्यति ॥३९॥ [१७१.a]

अहो चित्रे । तेऽपि तादृशा दिक्पतयस्त्वामनु त्वयि विषये मनस्तन्वते चित्तं ददति । त्वमपि च तेभ्यः सकाशाद् विमुखीति पराङ्मुखीति कौतुकम् । अहो अकिञ्चनं दरिद्रं क्व वा निधिरेति स वा कवाटं घटयन् मेलयन् निरस्यति निष्कासयति । निधिः शङ्खपद्मादिकः ॥३९॥

सहाखिलस्त्रीषु वहेऽवहेलया महेन्द्ररागाद् गुरुमादरं त्वयि ।
त्वमीदृशी श्रेयसि संमुखेऽपि नं पराङ्मुखी चन्द्रमुखि ! न्यवीवृतः ॥४०॥

अखिलासु स्त्रीषु विषये याऽवहेला अनादरस्तया सह महेन्द्ररागाद्धेतोः त्वयि विषये गुरुमादरमधिकं मानं वहे । अन्यासु सर्वासु स्त्रीषु विषये महती अवहेला मम मनसि वर्तते । इन्द्रस्त्वयि सानुराग इति त्वयि च महानादरः एवं च द्वयोर्दुर्वहयोस्तयो-मयि एकत्रावस्थानम् । यथा ह्यन्या स्त्रियस्तथा त्वमपि स्त्री । यथा तासु मेऽवहेला तथा त्वय्यपि युक्ता परमिन्द्रस्त्वामाद्रियते तस्य स्वामिनोऽनुरोधाद् अहमतितरामाद्रिये । ईदृशि श्रेयसि कल्याणे संमुखेऽभिमुखवर्तिनि हे शशिवदने ! त्वं पराङ्मुखी दत्त-पृष्ठा सती तं ममादरं निवर्तयसि स्म ॥४०॥

दिवौकसं कामयते न मानवी नवीनमश्रावि तवाननादिदम् ।
कथं न वा दुर्ग्रहदोष एष ते हितेन सम्यग् गुरुणापि शाम्यते ॥४१॥

मानुषी देवं नेच्छतीति ते मुखादेतन्नूनमश्रुतपूर्वं श्रुतम् । अथवा एष ते दुर्ग्रहो दुष्टो हठ एव दोषो दूषणं हितेनानुकूलेन गुरुणा पित्रापि सम्यक्कथं न शान्तिं नीयते । ईदृशं हठं कुर्वाणां भवतीं पितापि न निवर्तयतीत्यर्थः । अन्योऽपि दुष्टस्य ग्रहस्य सूर्यादेः पूतनादिकस्य वा दोष उपद्रवो वैकृतं वा हितेन गुरुणा पुरोधसा भूतविद्याकुशलेन वा सम्यग् यथावन्निवर्त्यते ॥४१॥

अनुग्रहादेव दिवौकसां[2] नरो निरस्य मानुष्यकमेति दिव्यताम् ।
अयोविकारस्वरितत्वमिष्यते कुतोऽयसां सिद्धरसस्पृशामपि[3] ॥४२॥

देवानां प्रसादमात्रेण नरो मनुष्यत्वं विहाय देवत्वं प्राप्नोति । पश्य सिद्धरसस्पृशाम-प्ययसां लोहमेदानां[-नाम-] अयोविकाराः फालकुशीदात्रप्रभृतयस्तेषां[4] स्वरितत्वं शब्दितत्वं कुत इष्यते जनैः, अपि तु न कुतोऽपि[5] रसः पारदः सिद्धो द्रव्यान्तरभावनापुटपाकादिभिः[6]

1. B. किञ्च तं. 2. B1. दिवौकसौ. 3. B1, B. -स्पृशा- 4. B. फाले. 5. B1. कोऽपि. 6. -युत-

सम्यक्प्रयुक्तैर्निष्पन्नास्तं स्पृशन्ति, [1]मनागेव लगन्ति यानि [2]तेषां तादृशामप्ययसामयसो ये विकाराः विशेषास्ते शब्दितत्वं भवत्येवेत्यर्थः। आयसो [3]यः फाल इत्यादि तेषां नाम न भवत्येव। सिद्धरससम्पर्कमात्रेण तेषां [4]रजतभावेन सुवर्णभावेन[5] वा परिणतत्वात् [6]तन्मूलमेव विशेषमुपादाय नामानि भवन्तीति भावः ॥७२॥

हरिं परित्यज्य नलाभिलाषुका न लज्जसे[7] वा विदुषिब्रुवा कथम्।
उपेक्षितेक्षोः करभाच्छमीरतादुरुं वदे त्वां करभोरु। भो इति ॥७३॥

हे भैमि! त्वं हरिमिन्द्रं परित्यज्य नलाभिलाषणशीला सत्यपि विदुषिब्रुवा सती कथं वा न लज्जसे। इन्द्रं हित्वा नलं कामयमाना सती त्वमात्मानं विदुषीं ब्रूषे। अत्र तव लज्जा युक्ता। यो हि धानुष्को बालबद्धां [8]लक्ष्यीकृतां कपर्दिकां पातयति भित्तौ च लक्ष्यीकृतायामपराद्धशरो भवति। स निजात्मानं धानुष्कं ब्रुवन्नवश्यं त्रपते। तथा त्रपा तवापि युज्यते। हे भैमि! उपेक्षितेक्षोः शमीरतात् करभादूरुमधिकां त्वां करभोरु भो इति वदे। करभोरु भो इति यः पदवर्णसमुदायो भवत्संबोधन-विषयस्तत्र योऽयमेकदेशः करभोरुशब्द[9]स्तस्यैवं निर्वचनं युक्तमित्यर्थः। करभादूरुः करभोरुरिति। अधिका रूपसिद्धिस्तु निरुक्तिकारवचनप्रामाण्याद्यथा कथंचिद् भवतु। करभोरु भो अत्र हि करभ इव ऊरू यस्याः सा करभोरूस्तस्याः संबोधनं करभोरु। भो इत्यव्ययं च संबोधनार्थं पदद्वयमस्ति। भोः करभोरु रमयन्ति। इति प्रायस्तस्याः संबोधनं कदापि च करभोरु भो इत्यपि भवति। द्योतकानां प्रयोगस्य परतोऽपि दृश्य-मानत्वात्। यथा - तरुणि हे! मम हृदये! इत्यादि। करभोरुशब्देन भोः संबोधनं यस्याः सा करभोरु भो इति वा करभोरु भोःशब्दो रमयन्त्यां छलपक्षे। भोः शब्दः संबोधनशब्दपर्यायः। तथा च करभोरुसंबोधना त्वामेवमित्यर्थः पर्यवसितो भवति। यथा-स्त्री भोदेवदत्तः। स्त्रीशब्द[10]संबोधन इत्यर्थः। अन्यत् तु सहृदयैः समाधेयम्। विदुषीमात्मानं ब्रूते विदुषिब्रुवेति ब्रुवशब्दे विदुषीशब्दस्य ह्रस्वः। वद्धातोर्मिथ्या-योगेऽभ्यासे च वद इति रुचादिगणे पाठः ॥७३॥

विहाय हा सर्वसुपर्वनायकं त्वयाश्रितः किं नरसाधिमभ्रमः।
मुखं विमुच्य श्वसितस्य धारया वृथैव नासापथधावनश्रमः ॥७४॥

---

1. B1 om. मनागे-. 2. B1 तु प्रत्यदृशा-. 3. D यः फले. 4. B1 स्वभावेन. 5. B1 om. -न वा (सुवर्णभावे-). 6. B1 om. -लमेव. 7. B1 लज्जये. 8. B1 लक्षी- 9. D करभोरुसिद्ध- 10. D om. -शब्द-

हा कष्टं, सकलसुरनाथं विहाय, त्वया नरसाधुत्वमोहः किमादृतः। इन्द्रान्नलः साधुरिति तव मोहः कर्तुं न युक्त इत्यर्थः। कथेव किं विहाय क इत्याह। मुखं विहाय श्वासस्य धारया लहरीप्रवृत्त्या वृथा, निरर्थकमेव। नासापथे यद्वा वनं स एव श्रमः स इव। मुखजं या हि श्वासधारया नासापथेन त्वरितप्रवर्तनं विचार्यमाणं श्रम एव ॥७४॥

तपोऽनले जुह्वति सूरयस्तनूर्दिवे फलायान्यजनुर्भविष्णवे।

करे पुनः कर्ष-[१४०-a]-ति सैव विह्वला बलाद्दिव त्वां वलसे न बालिशे! ॥७५॥

तप एवानलो वह्निस्तपोऽनलस्तत्र सूरयो धीमन्तस्तनूर्जुह्वति क्षिपन्ति। दुःखैस्तपोभिः कायान् क्लेशयन्तीत्यर्थः। किमर्थम्? । अन्यच्च तज्जनुश्च अन्यजनुर्भवान्तरं तत्र भविष्णु भवितृ तस्मै दिवे स्वर्गायैव फलाय। द्यौर्हि साक्षान्न फलम्। सैवैतादृशी द्यौर्विह्वला ससंभ्रमा सती त्वां करे धृत्वा कर्षति। हे बालिशे! मूर्खे! प्रवर्तसे न। अपि तु तव प्रवर्तनमेव युक्तम्। करे कर्षतीति दृढकाकुगर्भम्। वलसे न बालिशे! इति स्व-प्रधानमेव वाक्यम्। वलनं गात्रभ्रमपुरःसरं प्रवर्तनम् ॥७५॥

यदि स्वमुद्बन्धुमना विना नलं भवेर्भवन्तीं हरिरन्तरिक्षगाम्।

दिविस्थितानां प्रथितः पतिस्ततो हरिष्यति न्याय्यमुपेक्षते ॥७६॥

किं च नलं विना यदि त्वमुद्बन्धुमना भवेः। उद्बन्धुं वृक्षशाखादौ कण्ठपाशाक्षेप-पुरःसरमवलम्बितुं मनो यस्याः सा तथाविधा चेत्त्वं स्याः। ततः पश्चात् हरिरिन्द्रस्त्वां तथा करणादन्तरिक्षगां भवन्तीं हरिष्यति बलाद् ग्रहीष्यति। कीदृशः? दिविस्थितानां प्रसिद्धः स्वामी। अन्तरिक्षं च द्यौरस्त्येव। द्युशब्दवाच्यत्वात् तस्यापीति च्छलपक्षे। हि यस्मात् न्याय्यं न्यायागतं क उपेक्षते। अपि तु व्यवहारायातं कोऽपि नैव नाद्रियते ॥७६॥

निवेक्ष्यसे यद्यनले नलोज्झिता सुरे तदस्मिन्महती दया धृता।

चिरादनेनार्थयतापि दुर्लभं स्वयं त्वयैवाङ्ग! यदङ्गमर्प्यते ॥७७॥

नलोज्झिता सती यदि त्वमनलेऽग्नौ निवेक्ष्यसे स्थास्यसि, तर्ह्यस्मिन्देवे महती दया धृता दृढीकृता। अङ्ग भोः यत्कारणात् स्वयमात्मनैव त्वयाङ्गं शरीरमर्प्यते दीयते। अर्थात् तस्मै। कीदृशमङ्गं चिरेण बहुकालं यावत् तेन नलेन प्रार्थयता सता दुःप्रापम् ॥७७॥

जितं जितं तत्खलु पाशपाणिना विना नलं वारि यदि प्रवेक्ष्यसि।

तदा त्वदास्यान्बहिरप्यसूनसौ पयःपतिर्वक्षसि वक्ष्यतेतराम् ॥७८॥

यदि त्वं जलं विना वारि प्रवेक्ष्यसि। उदके मृत्यवे पतिष्यसि (प्रवेक्ष्यसि) नूनं तर्हि वरुणेन जितं जितं अत्यन्तं सर्वोत्कृष्टेन भूतम्। यतस्तदा वारिप्रवेशावसरे असौ पाशपाणिः पयःपतित्वात् त्वदाख्यान् भयन्नाम्नः असून् उरसि वक्ष्यतेतराम-तिशयेन धारयिष्यति। तस्य तावदेकेऽसवः प्रसिद्धा एवान्तरास्त्वन्नामस्तु बहिर्वक्ष्यति। त्वमाख्या नाम येषां तान्। त्वं हि साक्षादसव एवास्य केवलं नामत एव भेदः। वारिवर्तिनां वस्तूनां तु स्वामित्वं वरुणस्यैव ॥४८॥

करिष्यसे यद्यत एव दूषणादुपायमन्यं विदुषीति मृत्यवे।
प्रियातिथिः स्वेन गता गृहात् (गृहं) कथं न [140 b] धर्मराजं चरितार्थयिष्यसि ॥४९॥

अत एव पूर्वप्रदर्शिताद् दूषणाद् विदुषीति कृत्वा मृत्यवे यद्यन्यमुपायं करिष्यसे, तर्हि त्वं प्रियातिथिरात्मनैव गृहं गता धर्मराजं कथं न चरितार्थयिष्यसि। अपि तु तं [1] कृतार्थं करिष्यस्येव। धर्मप्रधानो हि राजा सामान्येऽप्यतिथावर्थाप्याजीते स्वं कृतार्थं मन्यते। किं पुनः प्रियेऽतिथौ स्वयं गृहागते। अथ च प्रिया प्रियतमा अतिथि-रागन्तुकरूपेति पदद्वयम्। पृथगेव उद्बन्धनवह्निस्थितिवारिप्रवेशेषु कृतमात्रेषु मृत्यौ प्रथमत एव तावत् त्वां तदधिकारिणो ग्रहीष्यन्ति उपायान्तरे मृत्यौ कृते सति धर्म-राजो मृत्युस्त्वां ग्रहीष्यत्येव। मृताः किल प्रथमं यमगृहं यान्त्येव। तदनु कर्मानु-सारेण ते स्थानान्तरं यान्ति। आत्मघातिनस्तु यमगृहं गत्वा किल यातनाः सहन्ते। त्वं तु प्रीतिपात्रभूता स्वयं गृहागता सती तस्मात् सत्कृतिमेव प्राप्स्यसीति निश्चयेन ॥४९॥

निषेधवेषो विधिरेष तेऽथवा तथैव युक्ता खलु वाचि वक्रता।
विजृम्भितं यस्य किल ध्वनेरिदं विदग्धनारीवदने तदाकरः ॥५०॥

[2] अथवा निषेधस्य वेष आकाररचना यस्य स निषेधवेषो, विधिरिति कर्तव्यतालक्षणो-ऽर्थं तव अत्र निषेधरूपे वाक्ये विधिः सूचकः काकुनामा स्वरोऽस्तीत्यर्थः। खलु यस्मान्मुख्यतया वक्रता तथैव वाचि युक्ता। वक्रभणितिस्तथैव युज्यत इत्यर्थः। किलेति सम्भावयामि। यस्य ध्वनेः काकुनाम्न इदमीदृशं विलसितम्। तद् ध्वने-रुत्पत्तिस्थानं विदग्धनारीवदनं चतुरनारीवक्त्रां भोजे हि वक्रोक्तिश्रियो निवसन्ति। "काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेः। प्रस्तुतादपरं वाक्यं समाश्रयोत्तरप्रदः। भङ्ग्श्लोकमुखेनाह यत्र वक्रोक्तिरेव सा"। अपरे तु तस्या बहवः संकीर्णभेदाः ॥५०॥

---

1. B. कृतकार्यं. 2. B1. om. अथवा ...... युज्यत इत्यर्थः।

भ्रमामि ते भैमि! सरस्वतीरसप्रवाहचक्रेषु निपत्य कत्यदः।

त्रपामनादृत्य मनाक् कुरु स्फुटं कृतार्थनीयः कतमः सुरोत्तमः॥ पू १॥

हे भैमि! तव सरस्वत्या वाचो योऽसौ रसो मृष्टताधारो गुणस्तस्य प्रवाहः प्रवृत्तिस्तस्य चक्रेषु चक्राकारभङ्गिषु निपतन् आप्याद एतदर्थं कतिवारान् भ्रमामि, भ्रान्तिं प्राप्नोमि। अहं बहुकृत्वो भ्रान्तिं प्राप्नुवन् भृशं खिन्न इत्यर्थः। अन्योऽपि सरस्वती नाम्न्या नद्या रसस्योदकस्य प्रवाहे ओघे यानि चक्राणि पुटभेदाश्च भ्रमणाख्यास्तत्र निपत्य बहुकृत्वो भ्राम्यन् चक्राकारां चेष्टां प्राप्नु-वन् खिद्यतेतराम्। तस्मात् त्रपामनादृत्य लज्जानुरोधं मुक्त्वा स्तोकं प्रकट्यं कतमः प्रकृ-[१४१-८]-ष्टः कः सुरोत्तमो दिक्पतिः कृतकार्यः कार्य इति। मनाक् कुरु स्फुटमस्य कर्मता कृतार्थनीयः कतमः सुरोत्तम इत्यस्यैव ॥ पू १॥

मतः किमैरावण(त)कुम्भकैतवप्रगल्भपीनस्तनदिग्धवस्तव।

सहस्रनेत्रान्न पृथग्मते मम त्वदङ्गलक्ष्मीमवगाहितुं क्षमः॥ पू २॥

ऐरावणः(त) पूर्वाशागजस्तस्य कुम्भौ तयोः कैतवेन मिषेण प्रगल्भौ विपुलौ पीनौ मांसलौ स्तनौ यस्याः सा तथाभूता या दिक् प्राची, अथ च नायिका तस्या धवः पतिः पालकोऽथ च प्रियो नायकः किं तव मतः इष्टः। जाने स तुभ्यं रोचते। कथं त्वयेदं तर्कितमित्याह। मम मते सहस्रनेत्रात् पृथगन्यो देवो द्विचतुःषडादिनयनः तवाङ्गस्य श्रियं परिकल्पयितुं न शक्तः सहस्रनेत्र एवात्र भवद्देहश्रियं परिच्छेत्तुमीष्टे नान्य इत्यर्थः। मतं पक्षः ॥ पू २॥

प्रसीद तस्मै दमयन्ति! सन्ततं त्वदङ्गसङ्गप्रभवैर्जगत्प्रभुः।

पुलोमजालोचनतीक्ष्णकण्टकैस्तनुं घनामातनुतां स कण्टकैः॥ पू ३॥

हे भैमि! तस्मै हरये प्रसीद प्रसादं विधाय तस्य कण्ठे मधूकस्रजमिव बाहुवल्लिद्वयं निधायानन्तरकरणीयं सम्पादयेत्यर्थः। नन्वेवं सति किं स्यात् तदाह। जगत्प्रभुस्त्रिभुवनभोगपात्रभूतः पुरुहूतस्त्वदङ्गसङ्गप्रभवैर्भवदाश्लेषजैः कण्टकैः रोमभेदैः सन्ततमनवरतं निजां तनुं निरन्तरां करोतु। यैः किं वस्तु-भिरित्याह। पुलोमजा शची तस्या नयनयोः कण्टकैरिव कण्टकैः निज-पद्माभिषिक्ताया सपत्न्यास्तथा विलासोल्लासदर्शनेन तदक्षिस्फोटात्। रोमभेदेऽपि कण्टकः (इति)। द्वितीयस्तु बिल्वबब्बूलबदर्यादिभवः प्रसिद्ध एव ॥ पू ३॥

अबोधि तत्त्वं दहनेऽनुरज्यसे स्वयं खलु क्षत्रियगोत्रजन्मन: ।

विना तमोजस्विनमन्यत: कथं मनोरथस्ते वलते विलासिनि! ॥५४॥

मया परमार्थो ज्ञात: त्वं ज्वलनेऽनुरक्तासि । कथं त्वमेवं जानासीत्याह । खलु यस्मात् । हे विलासिनि! विभ्रमयति[1] तव स्वयमात्मना क्षत्रियान्वयसूताया स्तमो-जस्विनं तेजोयुक्तं विनाऽन्यतोऽन्यस्मिन् मनोरथ: कथं वलते, अपि तु न कथमपि । क्षत्रिया हि स्वयं तेजस्विनी तेजस्विनमेव सति सम्भवे कामयते॥५४॥

त्वयैकसत्या तनुतापशङ्कया ततो निवर्त्यं न मन: कथञ्चन ।

हिमोपमा तस्य परीक्षणक्षणे सतीषु वृत्ति: शतशो निरूपिता ॥५५॥

एकैव सती एकसती । अद्वितीया पतिव्रता त्वया[2] एवंरूपया[3] त्वया देह-दाहभ्रान्त्या केनापि प्रकारेण तस्माच्चित्तं न निवर्तनीयम् । यत: परीक्षावसरे तस्य दहनस्य तुषारसदृशी वृत्ति: शतशोऽनेकवारानवधा-[181-b]-रिताऽस्ति । वृत्तिर्भवनं परीक्षाक्षणे साध्वी पुरुस्तात्[4] (पुरस्तात्) तुषारमेव भवतीत्यर्थ: ॥५५॥

स धर्मराजः[5] खलु धर्मशीलया त्वयास्ति चिन्तातिथितामवापित: ।

ममापि साधु प्रतिभात्ययं क्रमश्चकास्ति योग्येन हि योग्यसङ्गम: ॥५६॥

नूनमात्मना धर्मशीलया त्वया स धर्मराजश्चिन्तातिथितामवापितोऽस्ति[6], वरणाय सादरं चिन्तितोऽसीत्यर्थ: । अयं क्रमो ममापि सम्यक् परिस्फुरति । हि यस्मात् योग्येन पात्रेण सह योग्येन कृत्वा वा योग्यस्य पात्रस्य सङ्गम: शोभते । क्रम: पूर्वपरिपाटी ॥५६॥

अजातविच्छेदलवै: स्मरोत्सवैरगस्तिभासा दिशि निर्मलत्विषि ।

धृतावधिं कालममृत्युशङ्किता निमेषवत्तेन नयस्व केलिभि: ॥५७॥

हे भैमि! त्वं धृतावधिं नि:सीमानं कालं तेन देवेन सहामृत्युशङ्किता सती निमेषवदतिवाहय । कै: ? । असम्पन्नान्तरकणै: सुरतै: कृत्वा । क्व ? अगस्त्यमुनि-तेजसा[7] कृत्वा समुज्ज्वलायां दिशीति मनोहरत्वकथनम् । मुनिसंनिधानात् निर्मलत्वं निष्पापत्वं च ॥५७॥

1. B. विभ्रमवति 2. B1. तया 3. B1. -भूतया 4. B1. प्रभावात् - interliner.
5. B1. धर्मराज: 6. B1. -ऽसि 7. B. तेज:क्रिया

शिरीषमृद्वी वरुणं किमीहसे पयःप्रकृत्या मृदुवर्गवासवम् ।
विहाय सर्वान् वृणुते स्म किं न सा निशापि शीतांशुमनेन हेतुना ॥५८॥

त्वं शिरीषकुसुमवन्मृद्वी, अतो वरुणं नूनमनुरज्यसे । यतो मृदुवर्गस्य कोमलवस्तुकुलस्य वासवमिन्द्रं प्रथममित्यर्थः । कथा ? पयःप्रकृत्या जलमूलत्वेन । यो हि मृदुवर्गस्तत्र मार्दवमुदकमूलम् । अयं तु जलप्रकृतिरेव । सर्वान् देवान् विहाय सा निशाप्यनेनैव हेतुना किं शीतांशुं न वृणुते स्म । चन्द्रोऽपि समुद्रजत्वात् पयःप्रकृत्या कृत्वा मृदुवर्गमुख्यः । अन्ये हि नवनीताद्यः पदार्था जलसंबन्धात् मृदवः यथोर्वरुणचन्द्रयोः पय एव प्रकृतिमूलं तयोर्मार्दवं किमुच्यत इत्यर्थः । सजातीयसमूहो वर्गः पयः क्षीरं पयोऽम्बु च ॥५८॥

असेवि यस्त्यक्तदिवा दिवानिशं श्रियः प्रियेणानणुरामणीयकः ।
सहामुना तत्र पयःपयोनिधौ कृशोदरि ! क्रीड यथामनोरथम् ॥५९॥

हे तनुमध्ये ! तत्र क्षीरनीरनिधौ मनोरथानामनतिक्रमेणामुना देवेन सह क्रीड । तत्र क्वेत्याह । यस्त्यक्तदिवा मुक्तस्वर्गेण श्रिया[1] प्रियेण लक्ष्मीपतिना दिवानिशमसेवि । यतो दिवोऽपि सकाशादनणुरामणीयकोऽधिकतरकमनीयतागुण आसेवि आश्रितोऽस्तीत्यर्थः । भगवान् श्रिया[2] सह यथा तथा क्रीडति । तथाऽयं[3] त्वया सह क्रीडतु । [4]श्रीः सह विष्णुर्यथा ([5]यथा श्रीस्तेन सह) क्रीडति, तथा त्वमनेन सममित्यर्थः । क्रीडायां चात्र मुख्यत्वाद् दमयन्त्याः [कर्तृत्वम्] । [१४२.८] अप्रधानादेव तृतीयाया उत्पन्नत्वात् । एवमेव[6] च शृङ्गारः परं शृङ्गमधिरोहति ॥५९॥

इति स्फुटं तद्वचसस्तथादरात् सुरस्पृहारोपविडम्बनादपि ।
कराङ्कसुप्तैककपोलकर्णया श्रुतं च तद् भाषितमश्रुतं च तत् ॥६०॥

नूनं तया भैम्या कराङ्के सुप्तः स्थिरः एक एव कपोलः कर्णश्च यया स्तया तथाभूतया सत्या इति पूर्वोक्तं तत् तादृशं तस्य दूतस्य भाषितं श्रुतं चाश्रुतं च । श्रवणाश्रवणयोर्यथासङ्ख्यं हेतुद्वयमाह । तद्वचसो नलरूपस्य दूतस्य वाक्यस्य मान्यत्वादुचितत्वाद् वा सुरेभ्यो या स्पृहा, तस्या आरोपो बलेन न्यासस्तदेव विडम्बनं गोपनं, तस्मात् । न हि सा सुरेभ्यः स्पृहालुत्वेन तु बलात् तस्यां तद्भाव आरोपितः ॥६०॥

1. S. श्रियः 2. B1. प्रिया. 3. B1. अयं.
4. B1. श्री : सह विष्णुर्यथा. 5. S. यथा श्रीस्तेन सह. 6. B1. om. च ...-धिरोहति ।

चिरादनध्यायमवाङ्मुखी मुखे ततः स्म सा वासयते दमस्वसा ।
कृतायतश्वासविमोक्षणाय तं क्षणाद् बभाषे करुणं विचक्षणा ॥६१॥

ततः सा दमयन्ती अधोवदना सती मुखे चिरादनध्यायं वासयते स्म । उपचारेण न किञ्चिदुवाचेत्यर्थः । न केवलमेवं स्थिता कृतायतश्वासविमोक्षणा सती, क्षणात् करुणं दयाजनकं बभाषे च । यतो विचक्षणा चतुरा । एतदेव वैचक्षण्यं यदवसरोचितमुच्यते ॥६१॥

विभिन्दता दुष्कृतिनीं मम श्रुतिं दिगिन्द्रदूतीविकसूचिसंचयैः ।
प्रयातजीवामिव मां प्रति स्फुटं कृतं त्वयाप्यन्तकदूततोचितम् ॥६२॥

हे सौम्य ! प्रयातजीवामिव मृतकल्पां मां प्रति त्वयापि प्रकटमेवान्तकदूततोचितं कृतम् । अन्तकस्य यमस्य दूतस्य भावस्तत्ता, तस्या उचितमर्हम् । यमदूतस्य यत् कर्तुं युज्यते, तत् त्वया कृतमित्यर्थः । किं कुर्वता ? दुष्कृतिनीं पापीयसीं मम श्रुतिं कर्णं दिक्पतिदूःसन्देशा एव सूचीनां सञ्चयास्तैः कृत्वा विभिन्दता विध्यता । यमदूता हि दुष्कृतिनं जनं सूचीभिर्विभिन्दन्ति । श्रुतिशब्देन श्रुतिमन्तो वा दुष्कृतिनः ॥६२॥

त्वदास्यनिर्यन्मरलीकदुर्यशोमषीमयं सल्लिपिरूपभागिव ।
श्रुतिं ममाविश्य भवद्दुरक्षरं सृजत्यदः कीटवदुत्कटा रुजः ॥६३॥

त्वदास्यान्निर्यन्निर्गच्छद्यन्मभालीकमसत्यं दुर्यशः सैव मषी तन्मयं तथा निर्वृत्तं तथा । सती मूर्तिमती श्रेष्ठां वा लिपिं भजति यत् तत् सल्लिपिभाक् तादृशमिव अदः एतद् भवतो दुष्टमक्षरं मम श्रुतिमाविश्य प्रवेशपुरःसरं गृहीत्वा कीटवद् उत्कटाः प्रबला रुजः पीडाः सृजति । कीटः प्रसिद्धः । अक्षरस्य मूर्तत्वे प्राप्ते साम्यम् ॥६३॥

तमालिरूचेऽथ विदर्भजेरिता प्रगाढमौनव्रतयैकया सखी ।
त्रपां स-[१४२·६]-माराधयतीयमन्यया भवन्तमाह स्वरसज्ञया मया ॥६४॥

अनन्तरं भैमीप्रेरिता सखी तं नलमूचे । किमूचे तदाह । एकया स्वरसज्ञया इयं त्रपां समाराधयति, अन्यया द्वितीयया भवन्तमाह । एका स्वस्य रसना जिह्वा अन्या स्वरसं जानातीति स्वरसंज्ञा तया निजाभिप्रायविदा । एकया कीदृश्या ? प्रगाढं मौनव्रतं यस्याः सा तथा । तथा लज्जाभराज्जडीभूतयेत्यर्थः ॥६४॥

तमर्चितुं मद्वरणस्रजा नृपं स्वयंवरः सम्भविता परेद्यवि ।
ममासुभिर्गन्तुमनाः पुरःसरैस्तदन्तरायः पुनरेष वासरः ॥६५॥

तं नलं वरणमालया पूजयितुं परेद्यवि परस्मिन्नहनि स्वयंवरः सम्भविता, संभविष्यति। एष वासरः पुनस्तस्य स्वयंवरस्यान्तरायो विघ्नोऽस्ति। कीदृशः? अनुवर्तिभिर्मम प्राणैः सह गन्तुमनाः ॥६५॥

तदद्य विश्रम्य दयालुरेधि मे दिनं निनीषामि भवद्विलोकिनी।
नखैः किलाख्यायि विलिख्य पक्षिणा तवैव रूपेण समः स मत्प्रियः ॥६६॥

तस्मादद्य खेदापनोदं कृत्वा[1] मम दयालुरेधि भव। यतोऽहं त्वदीक्षणपरा सती, दिनं [2]नेतुमतिवाहयितुमिच्छामि। किल यस्मात् पक्षिणा हंसेन स मम प्रियो नलो भवत एव मूर्त्या समो नखैर्विलिख्य[3] कथित एवंरूप एव स तव प्रियोऽस्तीति ॥६६॥

दृशोर्द्वयी ते विधिनास्ति वञ्चिता मुखस्य लक्ष्मीं तव यन्न वीक्षते।
असावपि श्वस्तदिमां नलानने विलोक्य साफल्यमुपैतु जन्मनः ॥६७॥

तव नेत्रद्वयी वेधसा विप्रलब्धास्ति। यद्धेतोस्तव मुखश्रियं सा न पश्यति। निजमुख-शोभा प्रतिबिम्बं विना द्रष्टुं न घटते। तत्कारणात् श्व आगामिदिने इमां तव[4] मुखश्रियं साक्षान्नलमुखे दृष्ट्वा जन्मनः सफलत्वं प्राप्नोतु ॥६७॥

ममैव पाणीकरणेऽग्निसाक्षिकं प्रसङ्गसम्पादितमङ्ग ! सङ्गतम्।
न हा सदाधीतिधृतः स्पृहा कथं तवार्यपुत्रीयमजर्यमर्जितुम् ॥६८॥

हा कष्टं अङ्ग भोः। तवाप्यजर्यं सख्यमर्जितुं लब्धुं कथं न स्पृहा। अपि तु स्पृहा युज्यत एव। कीदृशम्? आर्यः श्वसुरस्तस्य पुत्र आर्यपुत्रस्तस्येदमार्यपुत्रीयं नलसंबन्धि। पत्युः साक्षान्नाम न गृह्यत इत्यार्यपुत्रसंज्ञया व्यवहारः। तव कीदृशस्य। सदाधीतिं सदाध्ययनं, तस्य धृत् धारकस्तस्य लक्षणया अतिसदृशस्येत्यर्थः। सदाध्यायिनो हि विद्यागुणेनातिसदृशा भवन्ति। कीदृशमजर्यम्। सङ्गतं युक्तम्। पुनः कीदृशम्?। ममैव पाणीकरणे विवाहे अग्निसाक्षिकं प्रसङ्गेन सम्पादितं योजितम्। अग्निः साक्षी यत्र तदग्निसाक्षिकम्। अग्निसाक्षिकं सख्यमवि-[193 a]-चलं भवति। अत एव वधूवरयो-र्विवाहे तत्सांनिध्यं विधीयते। सङ्गतमिति विशेषणतया व्याख्येयमत्रातीव सार्थकत्वात्। युक्तमेव हि सख्यं महागुणदायि ॥६८॥

---

1. D. सम. 2. D. नेतुमुद– 3. B1 विलोक्य. विलिख्य-marginalia
4. D. नल.

दिगीश्वरार्थं न कथञ्चन त्वया कदर्थनीयास्मि कृतोऽयमञ्जलिः।
प्रसद्यतां नाथ निगाद्यमीदृशी दधे दृशौ बाष्परयास्पदे भृशम्॥६९॥

दिक्पतिकृते केनापि प्रकारेणास्म्यहं त्वया न कदर्थनीया। अयमञ्जलिः कृतो-ऽस्ति। हस्तौ संयोज्य याचन्ती खल्वहमस्मि दिक्पतिनिमित्तं भूयो नैवं वक्तव्य-मित्यर्थः। वाक्यद्वयमिदं परस्परापेक्षं हेतुहेतुमद्भावेन। पुनः सम्भ्रमेणाह। प्रसादः क्रियतामथैवंभूतं न वाच्यम्। अहं भृशं नेत्रे बाष्परयास्पदे अश्रुप्रवाहस्थाने दधे धारयामि। अहमश्रुवर्षं दधत्यस्मीत्यर्थः। भविष्यत् समीपवर्तिनी वा वर्तमाना॥६९॥

वृणे दिगीशानिति का कथा तथा त्वयीति नेक्षे नलभामपीहया।
सतीव्रतेऽग्नौ तृणयामि जीवितं स्मरस्तु किं वस्तु तदस्तु भस्म यः॥७०॥

साहं दिगीशान् वृणे इति तथा का कथा, का वार्ता, अपि त्वयमर्थो जन्मसहस्रेणापि
1 न संभवतीत्यर्थः। या अहं त्वयि विषये तिष्ठतीति कृत्वा नलस्त्रियमपि नेक्षे, न पश्यामि, अहं सतीव्रत एवाग्नौ जीवितं तृणयामि, तृणं करोमि। तत् कारणात् स्मरः पुनः किं वस्त्वस्तु यः साक्षाद् भस्मैवास्ति, या किल वह्नौ प्रविशति, तस्या भस्मास्कन्दने क इव श्रमः। सतीव्रतमिष्टत्वादीदृशि व्यतिकरे वरमहं विपद्ये न तु स्मरवशवर्तिनी भूत्वा व्रतखण्डनं करोमीति भावः। खण्डखण्डवाक्ययोजनेयं लोकोक्तिसमाश्रयणेन॥७०॥

न्यवेशि रत्नत्रितये जिनेन यः स धर्मचिन्तामणिरुज्झितो यया।
कपालिकोपानलभस्मनः कृते तदेव भस्म स्वकुले स्तृतं त्वया॥७१॥

यो भगवता जिनेन वीतरागेण रत्नत्रितये न्यवेशि निवेशितः स्थापितः स एतादृशो-ऽयमभिलषितार्थदायी धर्म एव चिन्तामणिः कपाली शिवः शिरोऽस्थिभूषणो भूतेश-स्तस्य कोप एवानलस्तस्य भस्मार्थात् कामस्तस्य कृते तदर्थं यया स्त्रिया त्यक्तः तथा स्वकुले निजान्वये तदेव भस्म स्तृतं विकीर्णम्। धर्मार्थकामसमवाये तावद्धर्मस्य प्रथमनिर्देशात् सर्वदर्शनेषु प्राधान्यमस्यैव उक्तया युक्त्या जिनदर्शनेऽपि धर्मस्यातीव-प्राधान्यमित्यर्थः। रत्नत्रितयं जिनदर्शनप्रसिद्धम्। रत्नत्रितयनिविष्टत्वात् मणित्वम्। मणिर्हि रत्नं न हि विजातीयानामेकत्रनिवेशो युक्तः। केचन जिनमत्र बुद्धमाहुः॥७१॥

1. B1. वशं भवति

निपीय पीयूषरसौरसी-[१४३-८]-रसौ गिरः स्वकन्दर्पहुताशनाहुतेः।
कृतान्तदूतं न तथा यथोदितं कृतान्तमेव स्वममन्यतादयम् ॥७२॥

असौ नलः स्वसंबन्धी कन्दर्प एव हुताशनस्तस्याहुतेरिवाहुतेर्दमयन्त्याः पीयूषरसस्यौरसीः सोदरीर्गिरो निपीय तथा येन प्रकारेणोदितं कृतान्तदूतं स्वमात्मानं नामन्यत, अपि त्वदयं निष्करुणं कृतान्तं साक्षाद् यममेवामन्यतेति संबन्धः। उरसि भवा औरस्यो देहजाः पुत्र्यः ॥७२॥

स भिन्नमर्मापि तदर्तिकाकुभिः स्ववृत्तधर्मान्न निवर्तितुमैहत।
शनैरशंसन्निभृतं विनिश्वसन् विचित्रवाक्चित्रशिखण्डिनन्दनः ॥७३॥

स नलो विचित्रवाचि चित्रशिखण्डिनन्दनो बृहस्पतिः तस्याः अर्तिमिश्राभिः काकुभिर्भिन्नमर्मापि सन्, निजदूतसमयान्निवर्तितुं नैच्छत्। निभृतं गुप्तं विनिश्वसन् शनैर्मन्दं मन्दमशंसदूचे ॥७३॥

दिवौधवस्त्वां यदि कल्पशाखिनं कदापि याचेत निजाङ्गणालयम्।
कथं भवेरस्य न जीवितेश्वरा न मोघयाच्यः स हि भीरु! भूरुहः ॥७४॥

हे भीरु! दिवोधवस्त्वां यदि इन्द्रो निजाङ्गणस्थायिनं कल्पवृक्षं यदि कदापि त्वां याचेत तदा त्वमस्येन्द्रस्य जीवितेश्वरा प्रेयसी कथं न भवेः, अपि तु भवेः। हि यस्मात् स भूरुहः कल्पवृक्षो मोघयाच्यो निष्फलप्रार्थनो नास्ति ॥७४॥

शिखी विधाय त्वदवाप्तिकामनां स्वयंहुतस्वांशहविः स्वमूर्तिषु।
क्रतुं विधत्ते यदि सार्वकामिकं कथं स मिथ्यास्तु विधिस्तु वैदिकः ॥७५॥

शिखी वह्निर्भवल्लब्धीच्छां कृत्वा यदि सार्वकामिकं यज्ञं कुरुते, तदा स वेदविहितो विधिः पुनः कथमन्यथा भवतु। कीदृशः? स्वमूर्तिषु यथास्थाननियुक्तासु निजतनुषु स्वयमात्मनैव हुतं स्वांशभूतं हविर्होमद्रव्यं येन स तथा याज्ञिकास्तमुद्दिश्य यद्धवि-र्होष्यन्ति तदेव भूयः स त्वदाप्तिकामः सन्, तत्रैव निजतनूषु होष्यति, अथाचश्यं त्वां प्राप्स्यति। वैदिको हि विधिर्यथोदितस्तथैव। अयं च होमयज्ञलक्षणो विधिर्वैदिक एव ॥७५॥

सदा तदाशामधितिष्ठतः करं वरं प्रदातुं चलितादवलादपि।
मुनेरगस्त्याद् वृणुते स धर्मराड्यदि त्वदाप्तिं भण का तदा गतिः ॥७६॥

स धर्मराजः अगस्त्यान्मुनेः सकाशाद्यदि त्वदाप्तिं वृणुते, मह्यं दमयन्तीं देहीति प्रार्थयते। कथय तत्र कोऽभ्युपायः? मुनिभ्यो हि यद्धियते तदवश्यं लभ्यते।

कीदृशात् मुनेः सदा सर्वकालं तस्य धर्मराजस्याशां दिशमधितिष्ठतः। अतो बलादपि[1] वरमेव करं राजदेय[2]विभागं प्रदातुं चलितात् प्रवृत्तात्। श्राद्ध-[१४५·७]-णमात्रादपि धर्मप्रधाना राजानः करं नाददते, किमु तथाविधात् मुनेः। इति स्थितेऽपि स मुनिस्तद्दिग्निवासः कथादितो[3]ऽनृणीभवितुं बलादपि वरमेव करं दास्यति। स च ततस्त्वामेव वरिष्यति, तदा त्वमवश्यं तत्प्रिया भविष्यसीत्यर्थः ॥७६॥

क्रतोः कृते जाग्रति वेत्ति कः कति प्रभोरपां वेश्मनि कामधेनवः।
त्वदर्थमेकामपि याचते स चेत् प्रचेतसः पाणिगतैव वर्तसे ॥७७॥

अपां प्रभोर्वरुणस्य वेश्मनि को वेत्ति यज्ञार्थं कतिसङ्ख्याः कामधेनवो जाग्रति। अपि त्वसङ्ख्यातास्ता नित्यं संनिहिताः सन्ति, तासां मध्ये स वरुणो यदि भवन्निमित्तमेकामपि याचते, तदा वरुणस्य हस्तस्थितैवासि ॥७७॥

न संनिधात्री यदि विघ्नसिद्धये पतिव्रता पत्युरनिच्छया शची।
स एव राजव्रजवैशसात्[4]कृते परस्परस्पर्धिवरः स्वयंवरः ॥७८॥

पत्युरिन्द्रस्यानिच्छयाऽरुच्याऽनादेशेन पतिव्रता शची यदि विघ्नसिद्धये न संनिधानं करिष्यति तदा परस्परस्पर्धिनो वरा यत्र स तथाविधः स्वयंवर एव कथं भविष्यतीत्यध्याहारः। कस्मात्? राजव्रजवैशसात् नृपसमूहवधात्। शची पतिव्रताऽतः पत्युरादेशं नातिक्रामति। ततो भवद्विरोधाद् विघ्नसिद्धये इन्द्रनिषिद्धा सती, तत्र संनिधानं न करिष्यत्येव। अतः प्रदर्शितहेतुतः स्वयंवर एव न भविष्यति। अत्र च 'दिवोधव' इत्यारभ्य न संनिधात्रीत्यन्तं सर्वे श्लोका आगमार्थगर्भाः। अतो यथायोगमागमार्थोऽत्रावगन्तव्यः ॥७८॥

निजस्य वृत्तान्तमजानतां मिथो मुखस्य रोषात्परुषाणि जल्पतः।
युधं किमच्छत्रकदण्डताण्डवं भुजाभुजि क्षोणिभुजां दिदृक्षसे ॥७९॥

भो भैमि! त्वं क्षोणिभुजां युधं नानाशस्त्रास्त्ररणं दिदृक्षसे। तथा अच्छत्रकाणां छत्ररहितानां दण्डानां ताण्डवं नृत्यं अर्थाच्छस्त्राभावे छत्ररहितैर्दण्डैर्युद्धं पश्चाद् बहुनानाविधमाविध्यमानैर्युधं दिदृक्षसे। तथा भुजाभुजि भुजाभ्यां भुजाभ्यां प्रगृह्य युद्धं वृत्तं दिदृक्षस इति प्रत्येकं संबन्धः। प्रथमं नानाविधशस्त्रास्त्रयुद्धं तदनु छत्ररहितैर्दण्डैर्युद्धं पश्चाद् बाहुयुद्धमित्यर्थः। शूराः सम्भ्रमेण ह्येवमेव युध्यन्ते।

---

1· ऌ· वनादपि· 2· B1· प्रदेय-· 3· ऌ· -त्यो— 4· B1-सात्का ते·, ऌ·-सस्कृते·

किं कुर्वताम्? निभस्य मुखस्य वृत्तान्तमुचितानुचितमजानतामिति लोकोक्तिरियम्। अत एव किं कुर्वतः? मिथः परस्परं परुषाणि जल्पतो मुखस्येत्यर्थः। मिथोऽन्योन्यं वृत्तान्तमजानतां वा। अन्यच्च व्याख्यानान्तरं चिन्तनीयम्। युद्धशब्दे[1] स्त्रियां दिदृक्षस इति सनन्तस्य दृशेरात्मनेपदमेव[2]। [144-6] अच्छत्रकदण्डे इत्यनेन बहूनां राज्ञां वधः सूचितः ॥७९॥

अपार्थयन्याजकफूत्कृतिश्रमं ज्वलेद्रुषा चेद्वपुषा नु नानलः।
अलं नलः कर्तुमनग्निसाक्षिकं विधिं विवाहे तव सारसाक्षि! कम्? ॥८०॥

याचकानां ब्राह्मणानामग्निसमिन्धनमन्त्रोच्चारपुरःसरं या फूत्कृतिः फूत्करणं, तस्याः श्रमं खेदमपार्थयन्निष्फलं कुर्वन्। रुषा कृत्वा यदि त्वनलो न ज्वलेत्, न प्रदीप्येत, ततो नलः तव विवाहे अनग्निसाक्षिकं कं विधिं कर्तुमलं समर्थः। अपि तु, न कमपि। अप्रदीप्ते वह्नौ न हूयते, होमेनाप्रीणितो वह्निर्न साक्षीक्रियते। क्रोधात् तु याजकानां फूत्कारैरपि वह्निर्न दीप्यते। लोकेऽपि प्रसिद्धमपानवायुं मुञ्चतः फूत्कारैर्वह्निर्न ज्वलति, तथा तत्रापि तव क्रोधात् याजकानां मिथ्याऽपराधमुद्भाव्य न ज्वलिष्यति। तस्मिंश्चाज्वलिते तव विवाहेऽनन्तरो विधिः कश्चन न भविष्यतीत्यर्थः। फूत्कृति-रिति वा पाठः ॥८०॥

पतिंवरायाः कुलजं वरस्य वा यमः किमप्याचरितातिथिं यदि।
कथं न गन्ता विफलीभविष्णुतां स्वयंवरः साध्वि! समृद्धिमानपि ॥८१॥

हे साध्वि! सरलबुद्धे! कन्यायास्तव वरस्य वा नलस्य कमपि कुलजं गोत्रिणं यमो यद्यतिथिमाचरिता करिष्यति, तदा समृद्धिमानुपचितसम्भारोऽपि स्वयंवरः कथं न विफलीभविष्णुतां गन्ता, अपि तु निष्फलीभावुकत्वं गमिष्यत्येव ॥८१॥

अपः प्रति स्वामितया परः सुरः स ता निषेधेद्यदि नैषधक्रुधा।
नलाय लोभात् सतपाणयेऽपि ते पिता कथं त्वां वद सम्प्रदास्यते ॥८२॥

परः सुरः वरुणः अपः उदकं प्रति स्वामितया प्रभुत्वेन यदि नलगतकोपेन त्वद्गतकोपेन वा ता आपो निषेधेत्। अपां हि स्वामी वरुणोऽतस्ताभिस्तदादेशः कर्तव्य एव। ततोऽद्भिर्विना लोभेनाततः पाणिर्येन एवंभूतायाऽपि नलाय। त्वमेव कथय ते पिता त्वां कथं सम्प्रदास्यति। अन्यदपि दानमुदकं विना न स्यात्, कन्यादानं तु विशेषतः ॥८२॥

1. B. दुःखाढ्या। 2. B. सहानेपदमेवमेव।

इदं महत्तेऽभिहितं हितं मया विहाय मोहं दमयन्ति! चिन्तय।
सुरेषु विघ्नैकपरेषु को नरः करस्थमप्यर्थमवाप्तुमीश्वरः ॥८३॥

हे भैमि! इदमेतद्धितोपकारि ते मयोक्तम्। भ्रान्तिं मुक्त्वा त्वं विमृश। देवेष्वन्तरायैकनिष्ठेषु सत्सु को नरो हस्तगतमपि वस्तु लब्धुं प्रभुः, अपि तु न कोऽपि ॥८३॥

इमा गिरस्तस्य विचिन्त्य चेतसा तथेति[1] सम्प्रत्ययमाससाद सा।
अवारितावग्रहनीरनिर्झरे नभोनभस्यत्वमलम्भि यद् दृशौ ॥८४॥ [145.a]

एता वाचस्तस्य मनसा पर्यालोच्य सा तथेति इदमित्थमेवेति सम्प्रतीतिं प्राप। अथ दृशौ नभोनभस्यत्वं श्रावणभाद्रपदत्वं लम्भयति स्म। कीदृशौ? अवारितावग्रहौ अनिषिद्धवृष्टिनिरोधौ नीरनिर्झरौ ययोस्ते तथाभूते। नेत्रद्वयं प्रसृत[2]तोयगर्भमभूदित्यर्थः। अवारितावग्रहौ नभोनभस्यौ च बहुजलविमोक्षौ भवतः। अवग्रह इति वर्षप्रतिबन्धः। तत्त्वतस्तु दृशो निरोधमात्रम् ॥८४॥

स्फुटोत्पलाभ्यामलिदम्पतीव तद्विलोचनाभ्यां कुचकुड्[3]मलाशया।
निपत्य बिन्दू हृदि कज्जलाविलौ मणीव नीलौ तरलौ विरेजतुः ॥८५॥

तस्या विलोचनाभ्यामेवोत्पलाभ्यां कज्जलाविलौ द्वौ बिन्दू कुचकुड्मलाशया अलिदम्पतीव हृदि निपत्य नीलवर्णौ तरलौ हारमध्यगौ मणीव विरेजतुः। तद्विलोचनयोरुत्पलत्वेनोपलक्षणं कज्जलाविलबिन्दुद्वयस्य ततो विच्छिन्नस्य भृङ्गमिथुनत्वम्। कुचयोः कुड्मलद्वयत्वम्। दम्पतीव मणीवेत्यत्र मणीवादीनामुपसङ्ख्यानमिति द्विवचनमनाविति न सन्धिप्रतिषेधः। केचन वशब्दमेवाव्ययमिवार्थे मन्यन्ते। 'दम्पती जम्पती जायापती भार्यापती च तौ' ॥८५॥

धुता पतत्पुष्पशिलीमुखाशुगैः शुचेस्तदासीत् सरसी रसस्य सा।
रयाय बद्धादरयाश्रुधारया सनालनीलोत्पललोललोचना ॥८६॥

तदा सा भैमी शुचेः शृङ्गाराख्यस्य रसस्य सरसी बभूव। अथ च शुचेर्विशदस्य रसस्य द्रवद्रव्यविशेषस्य। इदानीं सरसीधर्ममाह। पतद्भिः पुष्पशिलीमुखस्य कामस्याशुगैर्बाणैर्धुता कम्पिता। अथ च पतन्तो धावन्तः पुष्पेभ्यः सकाशाद् ये शिलीमुखा भृङ्गास्तेषामाशुगेन वातेन धुता, तत्त्वतः सरसी। किञ्च रयाय वेगाय बद्धादरया वेगवत्या अश्रुधारया सनाले नालसहिते नीलोत्पले विलोचने एव यस्याः सा निरन्तराश्रुधारयोर्नालत्वं

1. B1. तथापि 2. B1. प्रभूत- 3. ठ.-- पद्म-

त्वल्लोचनयोर्नीलोत्पलत्वम्। अन्यापि सरसी पतद्भृङ्गा वातकम्पिता सती लोलसजाल-नीलोत्पला भवति। अश्रुधारयेति जातावेकवचनम्। 'शृङ्गारः शुचिरुज्ज्वलः' ॥८६॥

अथोद्भ्रमन्ती रुदती गतक्षमा[1] ससम्भ्रमा लुप्तरतिः[2] स्खलन्मतिः।
व्यधात्प्रियप्राप्तिविघातनिश्चयान् मृदूनि दूना परिदेवितानि सा ॥८७॥

अथैवं भावसङ्करविशिष्टा सती सा भैमी प्रियप्राप्तिविघातनिश्चयाद् हेतोर्दूना सती मृदूनि परिदेवितानि विलापान् व्यधात्। उद्भ्रमोऽपस्मारः।[3] सम्भ्रमः त्वरा ॥८७॥

त्वरस्व पञ्चेषुहुताशनात्मनस्तनुष्व मद्भस्ममयं यशस्त्वयम्।
विधे! परेहाफलभक्षणव्रती पताधे तृप्य-[145-b]-न्नसुभिर्ममाफलैः ॥८८॥

हे पञ्चेषुहुताशन कामाग्ने! त्वरस्व, ससम्भ्रमो भव। मम भस्मरूपं निजस्य यशसस्त्वयं तनुष्व विकिर। हे विधे! त्वं परेहाफलभक्षणव्रती भूत्वा ममाफलैरसुभिः कृत्वा तृप्यन् सन्। नत्वतस्तु नलाप्राप्तेर्निरर्थकैः ॥८८॥

भृशं वियोगानलतप्यमान किं विलीयसे न त्वमयोमयं[4] यदि।
स्मरेषुभिर्भेद्य! न वज्रमप्यसि ब्रवीषि न स्वान्त! कथं विदीर्यसे ॥८९॥

हे स्वान्त! हृदय भृशं वियोगानलेन तप्यमान ध्मायमान यदि त्वमयोमयं लोह-घटितं तर्हि विलीयसे किं न। अतितप्तलोहस्य द्रवीभावो युक्तः। हे स्मरेषुभिर्भेद्य! वज्रमपि नासि। यदि त्वं वज्रं भवेस्तदा स्मरेषुभिः कुसुमैर्निर्भिद्येथाः। ब्रवीषि न, कथयसि न, कथं न भिद्यसे। 'ब्रवीषि न' इति नकारः काक्वा[5] विधौ ॥८९॥

विलम्बसे जीवित! किं द्रव द्रुतं ज्वलत्ययं ते हृदयं निकेतनम्।
जहासि नाद्यापि मृषा सुखासिकामपूर्वमालस्यमहो तवेदृशम् ॥९०॥

हे जीवित! किं विलम्बसे, किं शिथिलो[6] भवसि। द्रुतं द्रव त्वं पलायस्व। यतः अद एतत्ते निकेतनं हृदयं ज्वलति। गृहे प्रदीप्यमाने तत्स्वामी मध्यस्थितो यदि द्रुतं निर्गत्य न प्रयाति। तदवश्यं विनश्यति। मृषा वितथां[7] सुखासिकां सुखेनासनम-द्यापि न त्यजसि। अपि त्वधुना तव सुखोपवेशनमिह त्यक्तुं युज्यते। अहो तव ईदृशमेवंरूपमालस्यं शीतलत्वमपूर्वमननुभूतचरम्। 'गृहे ज्वलत्यपि सुखासीनो हि तिष्ठतीत्येवंभूत आलस्यवानितः पूर्वं त्वत्सदृशो न दृष्टो, न च श्रुत' इति लोकोक्तिरियम् ॥९०॥

---

1. S. गत-  2. S. -रसि.  3. S. om. सम्भ्रमः त्वरा.  4. Bl. -निर्भं. S. om. मयं.
5. S. om. काक्वा विधौ.  6. Bl. शिथिलं.  7. S. वितथ्यां.

दृशौ ! मृषा पातकिनौ मनोरथाः कथं पृथू वामपि विप्रलेभिरे ।
प्रियश्रियः[1] प्रेक्षणघाति पातकं स्वमश्रुभिः क्षालयतं शतं समाः ॥९१॥

हे दृशौ ! पातकिनः पापीयांसो मनोरथा मृषा निरर्थकमेव वां युवामपि पृथू पृथुना विपुले कथं विप्रलेभिरे वञ्चितवन्तः । पातकिनो मनोरथा[2] इति लोकोक्तिरीदृशी । पापिष्ठा हि निष्कारणमेव पृथून् विपुलाशयानपि विप्रलभ्मते । यस्माच्च विप्रलब्धौ तस्मात् स्थाने किमपि युवयोः पातकमस्ति । प्रियश्रियो नलकान्तेः प्रेक्षणघाति[3] दर्शननाशकं स्वं पातकं शतं समा बहून् संवत्सरान् क्षालयतं शोधयन्तं तस्मिन् पातके प्रक्षालिते युवयो-र्नलदर्शनं घटत इति भावः ॥९१॥

प्रियं च मृत्युं न लभे त्वदीप्सितं तदेव न स्यान्मम यत्त्वमिच्छसि ।
वियोगमेवेच्छ मनः ! प्रियेण मे तव प्रसादान्न भवत्यसौ मम ॥९२॥

हे मनः ! त्वदीप्सितं भवदिष्टं प्रियं रुचितं मृत्युं चाहं न लभे । सम्प्रति हि मृत्यु-स्त्वतीव रुचितोऽस्ति । तं चाहं न प्राप्नोमि । यत्त्वमिच्छ-[१९६-a]-सि तदेव मम न स्यात् । तर्हि मम प्रियेण नलेन सह वियोगमेवेच्छ, अभिलष, तव प्रसादान्ममासौ प्रियवियोगो[4] न भवतु । उक्तिप्रत्युक्तौ वाक्यानां पृथक्त्वे पौनरुक्त्यं न दोषः ॥९२॥

न काकुवाक्यैरतिवाममङ्गजं द्विषत्सु याचे पवनं तु दक्षिणम् ।
दिशापि मद्भस्म किरत्वयं तथा प्रियो यथा[5] वैरविधिर्वधावधिः ॥९३॥

अहं काकुवाक्यैः कृत्वा अङ्गजं पुत्रमपि (लि) वाममतिप्रतिकूलं न याचे[6] । अथ चाङ्गजं मनोभवं कामं वा मम दक्षिणं हितेषु मध्य इत्यर्थायालम् । द्विषत्स्वहितेष्वपि मध्ये दक्षिणमनुकूलं पवनं वायुं याचे । अथ च दक्षिणमवामम् । दक्षिणदिग्भवमिति तु तत्त्वतः । ननु तत्संयोगादनिष्टं भविष्यतीत्याह । अयं दक्षिणः पवनः तया दिशा मम भस्मापि किरतु विक्षिपतु यया प्रियो वर्तते । ननु योऽयं मारयति स मारणानन्तरमपि तस्येष्टं कथं करोतीत्याह । वैरविधिर्वैरकृतिर्वधावधिर्मारणं यावत् । वधानन्तरं वैरकरणं निवर्तत इत्यर्थः । नलदिशा दमयन्त्या भस्मकिरणं तु तस्य महानुपकारः ॥९३॥

अमूनि गच्छन्ति युगानि न क्षणः कियत् सहिष्ये न हि मृत्युरस्ति मे ।
न मां तु कान्तः स्फुटमन्तरुज्झिता न तं मनस्तच्च न कायवायवः ॥९४॥

1. B1, D. प्रियः. 2. D. मनोरथौ. 3. D. –याति. 4. B. –विप्रयोगो.
5. D. यथा. 6. D. ययाचे.

अमूनि युगान्येव गच्छन्ति, न क्षणो गच्छति। क्षणोऽनुधः। युगानि तु विधेयानि। एकः क्षणोऽयं युगसहस्रप्रमाण इत्यर्थः। कियद् बहु सहिष्ये क्षमिष्ये, अपि त्वतोऽनन्तरमधिकं सोढुं न सहास्मि। मे मृत्युर्न चास्ति, स चेद् भवति तदा इयमीदृशी कदर्थना नानुभूयते। कान्तस्तु स्फुटं मामन्तर्हृदि वर्तमानो नोज्झिता, न त्यक्तुकामः। तं कान्तं मनश्चित्तं नोज्झितृ। तच्च मनः कर्मतापन्नं कायवायवः प्राणा नोज्झितार इति कथं मृत्युर्भवत्विति भावः। उज्झितेति तृन् श्वस्तनी वा ॥९४॥

मदुग्रतापव्ययशक्तशीकरः सुराः! स वः केन पपे कृपार्णवः।
उदेति कोटिर्न मुदे मदुत्तमा किमाशु संकल्पकणक्रमेण वः ॥९५॥

हे सुराः! स तादृशो युष्माकं कृपार्णवो दयासमुद्रः केन पीतः। कीदृशः? मभोग्रस्य तापस्य व्यये शक्तः शीकरः पयस्त्रसरेणुर्यस्य स तथा। समुद्रस्य शीकरव्यये क उपद्रवः। भङ्ग्या तमेव कृपाकणमाह। युष्माकं संकल्पकणव्ययेन मत्तोऽप्युत्तमा शीघ्रं युष्मत्प्रीत्यै स्त्रीणां कोटिः किं नोदेति, अपि तु भवत्संकल्पमात्रेण भवतां प्रमोदाय क्षमा मत्तो विशिष्टाः सङ्ख्यातीता नार्यः समुत्पद्यन्त एव ॥९५॥

ममैव वाहर्दिवमश्रुदुर्दिनैः प्रसह्य वर्षासु ऋतौ प्रसञ्जिते।
कथं न शृण्वन्तु सुषुप्य देवता भवत्वरण्येरुदितं न मे [१४६-७]- गिरः ॥९६॥

अथवा देवताः सुषुप्यातिशयेन सुप्त्वा कथं शृण्वन्तु। क्व सति? । सुषुप्येत्याह। अहर्दिवमहोरात्रं यानि ममाश्रूणां दुर्दिनानि मेघतिमिराणि, तैः कर्तृभिः प्रसह्य बलादप्रस्तावेऽपि वर्षासु ऋतौ प्रावृड्नाम्नि समये प्रसञ्जिते प्रसङ्गीकृते सति। वर्षासु चावश्यं देवताभिर्निर्भरनिद्रया शयितव्यम्। अत एव तद्विज्ञप्तिरूपा मम गिरोऽरण्येरुदितं निर्जनवनरोदनं न भवतु, अपि तु तत्तुल्यत्वात्तु इमास्तदेव निर्जने रुदन्तं को निवारयति। स्थितिस्त्वीदृशी यद्रुदन्निवार्यते। अरण्येरुदितमिति सप्तम्यलुक्त्वा षष्ठीस्थाने सप्तमी वा। अरण्यस्य रुदितमित्यर्थः। सुषुप्येति सुपूर्वः स्वप् ॥९६॥

इयं न ते नैषध! दृक्पथातिथिस्त्वदेकतानस्य जनस्य यातना।
हृदे हृदे हा न कियद् गवेषितः स वेधसाऽगोऽपि खगोऽपि वक्ति यः ॥९७॥

हे नल! त्वदेकतानस्य भवदनन्यवृत्तेर्जनस्य मल्लक्षणस्येयमीदृशी यातना तीव्रवेदना न तव दृक्पथातिथिर्न दर्शनमान्या। तव दर्शनेन हीयं सत्कृता भवेत्। हा कष्टं प्रतिहृदं कियन्नान्वेषितः परं वेधसा सोऽपि खगो हंसोऽलोऽपि लुप्तोऽदर्शनं नीतो यो वक्ति अर्थात् गत्वा तवाग्र इत्यर्थः। सापेक्षं वाक्यमिदं प्रायः ॥९७॥

ममापि किं नो दयसे दयाघन! त्वदङ्घ्रिमग्नं यदि वेत्थ मे मनः।
निमज्जयत्सन्तमसे पराशयं विधिस्तु वाच्यः क्व तवागसः कथा?॥९८॥

हे दयाघन! प्रिय! त्वं किं ममापि नो दयसे? अपि तु दयाघनत्वादवश्यं मयि दयां करोषि। परं यदि मम चित्तं भवच्चरणशरणं जानासि। न हि मम मनो निजैकनिष्ठं जानन्मामीदृगवस्थामुपेक्षसे। तस्मात् तवात्र दूषणं नास्ति। परेषामाशयमन्तःकरणं सन्तमसे गाढे ध्वान्ते बोलयन् विधिः पुनर्वाच्यो वचनीयार्हः। तवागसोऽपराधस्य कथा वार्ता[1]ऽपि का, अपि तु न काऽपि। कस्य किल मिथ्या [2]कल्पनारूपाऽपि भवतीति लोकोक्तिरियम्॥९८॥

कथावशेषं तव सा कृते गतेत्युपैष्यति श्रोत्रपथं कथं न ते।
दयाणुना मां समनुग्रहीष्यसे तदापि तावद्यदि नाथ! नाधुना॥९९॥

[3]हे नल! सा दमयन्ती तव कृते कथावशेषं [4]गता विपन्नेति जनोक्तिस्तव श्रोत्रपथं कथं नोपैष्यति, अपि तु प्राप्स्यति। कर्णाकर्णिकयापि निजनिमित्तमृतां[5] मां भवान् श्रोष्यति। हे नाथ! यदि नाधुना जीवनावसरे तर्हि तदापि तावत्करुणाकणेन कृत्वा मां समनुग्रहीष्यसे, प्रसादपात्रं करिष्यसि॥९९॥

ममादरीदं विदरीतुमान्तरं तदर्थिकल्पद्रुम! किञ्चिदर्थये। [147.a]
भिदां हृदि द्वारमवाप्य मैव मे हतासुभिः प्राणसमः समं गमः॥१००॥

हे याचककल्पवृक्ष! ममेदमान्तरं स्वान्तं विदरीतुं स्फुटितुमाद्रि, आदरयुक्तं वर्तते। तस्मात् किं [6]याचे। त्वं हृदि भिदामेव द्वारं निर्गमनपथमवाप्य दग्धप्राणैः समागमः मा गच्छ, [7]यतस्त्वं प्राणसमोऽसि। यश्च प्राणसमस्तस्य तैर्गच्छद्भिः समं गमनं संगतमेव॥१००॥

इति प्रियाकाकुभिरुच्चरन् भृशं द्विजीशदूत्येन हृदि स्थिरीकृतः।
नृपं स योगेऽपि वियोगमन्मथः क्षणं तमुद्भ्रान्तमजीजनत्पुनः॥१०१॥

स विरहस्मरः हृदि वर्तमानोऽर्थान्नृपस्यैव एवं प्रेयसीदीनवचनैरुच्चरन् सन् द्विजीशदूत्येन च स्थिरीकृतः स्तम्भितः सन् योगे सङ्गमेऽपि सति क्षणमात्रं तं नृपमुद्भ्रान्तमपस्मारिणमिव स्मृतिरहितं पुनरजीजनत्। पुनरिति पूर्वापेक्षया यथाकथञ्चित्तु घटनीयम्। अथवा सा दमयन्ती तादृगवस्थासीत् तं पुनर्नृपं वियोगमन्मथ एवं चकारेति भिन्नक्रमः संबन्धः॥१०१॥

---

1. & वार्तामपि. 2. B1 om. कल्पना ---- भवतीति. 3. B1 om. हे नल --- दमयन्ती.
4. B1 om. गता विपन्नेति. 5. & -- मृता. 6. B1 ययाचे. & वियाचे. 7. B1 यस्त्वं.

महेन्द्रदूत्यादि समस्तमात्मनस्ततः स विस्मृत्य मनोरथस्थितैः।
क्रियाः प्रियाया ललितैः करम्बिता विकल्पयन्नित्थमलीकमालपत् ॥१०२॥

ततः स नलो महेन्द्रदूत्यादि निखिलमात्मनः स्वरूपं विस्मृत्य मनोरथवर्तिभिः प्रियाया ललितैः शृङ्गारचेष्टाभिः करम्बिताः संकीर्णाः क्रियाश्चेष्टा अर्थात् प्रियाया एव विकल्पयन् बहुधा विचारयन् इत्थं वक्ष्यमाणमलीकं मिथ्यैवालपत् ॥१०२॥

अयि प्रिये! कस्य कृते विलिप्यते विलिप्यते हा मुखमश्रुबिन्दुभिः।
पुरस्त्वयालोकि नमन्नयं न किं तिरश्चलल्लोचनशीलया नलः ॥१०३॥

अयि प्रिये, कस्य कार्यस्य हेतोर्विलापः क्रियते। हा कथं मुखं नयनजलकणैः पिधी-यते। अयं नलः पुरो नमन्नेव त्वया किं न दृष्टः, यतः कीदृश्या। तिरश्चलन्ती लोचने यत्र तत् तथाभूतं शीलं यस्याः सा तथा, तया। तिरस्तिर्यगर्थेऽत्र ॥१०३॥

चकास्ति बिन्दुच्युतकातिचातुरी घनाश्रुबिन्दुच्युतिकैतवात्तव।
मसारताराक्षि! ससारमात्मना तनोषि संसारमसंशयं ततः (यतः) ॥१०४॥

मसारतारे मसृणकनीनिके अक्षिणी यस्या तस्याः संबोधनं हे मसारताराक्षि! तव निरन्तरनयनोदबिन्दुमुखात् बिन्दुच्युतकेषु लिपिविशेषेष्वतिचातुरी महती वैदग्धी चकास्ति। अनेन मिषेण त्वं निजां बिन्दुच्युतकातिवैदग्धीं विबोधयन्ती वर्तसे। यतो निःसन्देहं स्वस्वरूपेण कृत्वा त्वं संसारं जगत् ससारं करोषि। संसारशब्दो बिन्दुं च्यावयित्वा ससार इति कृतस्त्वया स्वयमेव। तत्त्वतस्तु संसरन्त्यस्मिन्निति संसारो जगत्। ससारः स्थिरांशयुक्तः कृतः त्वां स्त्रीरत्नभूतां [१४७.७] विना प्रभूतविविधस्त्रीकोऽपि संसारः फल्गुत्वादेरण्डदण्डवत् पुद्गल एवासीत्। विविधवस्तुभृतोऽपि त्वां विना निःसार एवेति वा व्याख्येयम् ॥१०४॥

अपास्तपाथोरुहि शायितं करे करोषि लीलानलिनं किमाननम्।
तनोषि हारं कियदश्रुणः स्वैरदोषनिर्वासितभूषणे हृदि ॥१०५॥

त्यक्तपद्मे पाणौ मुखमेव क्रीडाब्जं स्थिरं किं करोषि। यद्येकं लीलाब्जं त्यक्तं तर्हि द्वितीयं किमित्यात्तम्। किं च दोषं विनैव दूरीकृतालङ्कृतिनि हृदि नयनवारिस्रवणैः कृत्वा कियदधिकं हारं तनोषीति परिवृत्तिरलङ्कृतिः। भूषणेषु हारस्य प्राधान्यं स चेद् दूषणं विनैव निरस्तस्तदर्थमन्यो नयनजलबिन्दुमयः किमित्युपादीयते। कियदिति क्रिया-विशेषणम् ॥१०५॥

दृशोरमङ्गल्यमिदं मिलज्जलं[1] करेण तावत्परिमार्जयामि ते ।
अथापराधं भवदङ्घ्रिपङ्कजद्वयीरजोभिः सममात्ममौलिना ॥१०६॥

इदं तावदमङ्गलसूचकं मिलदुत्पधभावं बहलीभवद्दृशोर्जलं तावत्पाणिनैवोत्पुंसयामि पश्चादपराधं त्वत्पदपङ्कजद्वयपरागैः[2] सहैव निजोत्तमाङ्गेनोत्पुंसयामीति । आत्ममौलिनेत्यात्म-शब्देनावान्तरकरणसंबन्धिभावो निरस्तः स्वरूपकथनमात्रं वा ॥१०६॥

मम त्वदच्छाङ्घ्रिनखामृतद्युतेः किरीटमाणिक्यमयूखमञ्जरी[3] ।
उपासनामस्य करोतु रोहिणी त्यज त्यजाकारणरोषणे ! रुषम् ॥१०७॥

हे अकारणरोषणे ! भामिनि क्रोधं जहिहि । मम किरीटे वर्तमानस्य माणिक्यस्य लौहित्या-त्मनो मयूखमञ्जरी किरणच्छटा रोहिणी रोहिणीनामनक्षत्रमुपेत्य स्वयमेव गत्वा त्वद-च्छाङ्घ्रिनखामृतद्युतेरुपासनां सेवां करोतु । रोहिणीनक्षत्रं हि कलत्रमिन्दोः । तत्त्वतस्तु रोहिणीवर्णेन तवाच्छोऽङ्घ्रिनख एवामृतद्युतिश्चन्द्रस्तस्या तदा किरीटस्यासद्भावेऽपि पूर्वा-वस्थास्वरूपव्यवहारात् किरीटनिर्देश एवमन्यत्र ॥१०७॥

तनोषि मानं मयि चेन्मनागपि त्वयि श्रये[4] तद्बहुमानमानतः ।
विनम्य वक्त्रं यदि वर्तसे कियन्नमामि ते चण्डि ! तदा पदावधि ॥१०८॥

हे चण्डि ! यदि त्वं मयि विषये मनाक् स्तोकमपि मानं प्रणयक्रोधचेष्टां तनोषि तदाह-मासमन्तान्नतः प्रह्वः सन्, त्वयि विषये बह्वधिकं यथास्यादेवं मानं श्रये । तत्त्वतस्तु बहुमान आदरातिशयः आनमनेन[5] स कृतो भवत्येव । यदि कियन्मनागपि मयि मुखमधोगतं कृत्वा तिष्ठसि, तदाहं ते पदावधि चरणौ यावन्नमामीति कियद्वदनानमनचरणावधिनमन[6]-योर्विरोधे महदन्तरम् ॥१०८॥

प्रभुत्वभूम्ना ~~[illegible]~~ -[६८·a]-नुगृहाण वा न वा प्रणाममात्राधिगमेऽपि कः श्रमः ।
क्व याचतां कल्पलतासि मां प्रति क्व दृष्टिदाने तव बद्धमुष्टिता ॥१०९॥

प्रभुत्वभूम्ना श्रीमत्ताधिक्येन कटिसूत्रादिदानेनानुगृहाण वा मां न वाऽनुगृहाण तव तत्र स्वेच्छा दत्ता । मम प्रणामस्याधिगमेऽवधारणेऽपि तव कः श्रमः । अपि तु प्रणाममात्रं तावदवहिता भूत्वाऽधिगच्छ । क्व मार्गणगणसंबन्धिनी कल्पवल्ली वर्तसे । क्व च मम दृष्टिदानेऽपि बद्धमुष्टिता लक्षणयातीव कार्पण्यम् । तव याचतां कल्पलतायाः ममापि याचकत्वात् संबन्धो विघत एव ॥१०९॥

1. B1 कियत्, D गलत् 2. B1 पारागैः 3. B1 मण्डली 4. D श्रिये 5. B1 आनमने च
6. B1 वनमन, D विनमन.

स्मरेषुमाथं सहसे मृदुः कथं हृदि द्रढीयःकुचसंवृते तव।
निपत्य वैसारिणकेतनस्य वा व्रजन्ति बाणा विफलीभविष्णुताम् ॥११०॥

त्वं मृदुः सती कामशरमथनं कथं सहसे। अथवा वैसारिणकेतनस्य मत्स्यकेतोर्बाणास्तव हृदि निपत्य विफलीभविष्णुतां निरर्थकीभावुकत्वं व्रजन्ति। यतो दृढतरघनस्तनपिहिते पाषाणादिवेष्टिते सुकुमारेऽपि वस्तुनि महाधनुर्धरस्यापि शरा विफलीभवन्त्येव। विफलीभवनं भग्नलोहमुखत्वम्। बाणानां हि लोहं मुखं फलमेवोच्यते। वैसारिणो मत्स्यः ॥११०॥

स्मितस्य सम्भावय सृक्वणा कणान् विधेहि लीलाचलमञ्चलं भ्रुवः।
अपाङ्गरथ्यापथिकीं च हेलया प्रसह्य संधेहि दृशं ममोपरि ॥१११॥

सृक्वणा ओष्ठप्रान्तेन यत् स्मितं, तस्य कणान् सम्भावय, बहुमानमागतां नय। मनाक् स्मितं क्रियतामित्यर्थः। भ्रुवोऽञ्चलं लीलया चलं विभ्रमभ्रान्तं कुरु। हेलयैव प्रसह्य बलादपि ममोपरि दृशं संधेहि योजय। कीदृशीम्? अपाङ्गराजमार्गपान्थीम्। प्रसधेति वा पाठः ॥१११॥

समापय प्रावृषमश्रुविप्रुषां स्मितेन विश्राणय कौमुदीमुदः।
दृशावितः खेलतु खञ्जनद्वयी विकासि पङ्केरुहमस्तु ते मुखम् ॥११२॥

अश्रुबिन्दूनां प्रावृषं समापय। वर्षासमाप्तौ शरत्प्रवेशधर्ममाह। स्मितेन कृत्वा कौमुदीमुदो ज्योत्स्नासुखानि देहि। प्रायः शारदी कौमुदी मुदेऽतीव विधात्री तथैव च कुमुदसंबन्धः। दृशावेव खञ्जनद्वयी इतो मयि खेलतु। शरत्प्रवेशे खञ्जरीटाः समायान्तीति प्रसिद्धमेव। ते तव मुखमेव पङ्कजं विकास्यस्तु। शरदि पङ्कजानि विकसन्ति। विकस्वरं वारिजं त्वन्मुखमेव सम्पद्यतामित्यर्थः ॥११२॥

सुधारसोद्वेलनकेलिमक्षरस्रजा सृजान्तर्मम कर्णकूपयोः।
दृशौ मदीये मदिराक्षि! कारय स्मितश्रिया पायसपारणाविधिम् ॥११३॥

अक्षरस्रजा वर्णमालया कृत्वा मम कर्णयोरेव कूपयोरन्तर्मध्ये सुधारसस्य यदुद्वेलनमुत्परणं सै-[१४४·७]-व केलिः क्रीडेति पर्यवसितोऽर्थोऽस्य मधुरवचनश्रावणमेव। हे मदिराक्षि! सहजरक्तनेत्रे मदीये दृशौ प्रयोज्ये कर्त्रौ स्मितश्रिया कृत्वा पायसे क्षीरे या पारणाविधिर्लङ्घनानन्तरं भोजनकरणं तं कारय। लङ्घनानन्तरं पित्तोपशमनाय प्रायो दुग्धरादि भुज्यते। स्मितं प्रदर्शयेति तात्पर्यार्थः।

पारणावचनाल्लङ्घनमायातं, तच्च विरहाद् विशेषतो वस्त्वन्तरदर्शनाभावः। तदवलोकन-
-बुभुक्षैव वा पारणाहेतुः ॥११३॥

ममासनार्धे भवमण्डनं ननु प्रिये! मदुत्सङ्गविभूषणं भव।
भ्रमाद् भ्रमादाल्पमङ्ग! भूष्यतां विना ममोरः कतरत्तवासनम् ॥११४॥

हे प्रिये! ममासनास्यार्धे मण्डनं भव। ननु न सम्यगुक्तं ममोत्सङ्गस्य विभूषणं भव। भ्रमाद्भ्रमाशल्पं, भ्रमेण भ्रमेण भाषितवानस्मि। ममोरो वक्षस्तटं विना तव कतरदासनम्। इतोऽन्यत् प्रकृष्टमासनं नास्त्येवेत्यर्थः। पूर्वपूर्वारुचौ लोकोक्तेरेवायमनुकारः ॥११४॥

अधीतपञ्चाशुगबाणवञ्चने! स्थितासि मदन्तर्बहिरेषि चेदुरः।
स्मराशुगेभ्यो हृदयं बिभेतु न प्रविश्य तत्त्वन्मयसम्पुटे मम ॥११५॥

अधीतं पञ्चाशुगबाणानां वञ्चनं यया तस्याः संबोधनं हे अधीतपञ्चाशुगबाणवञ्चने! त्वं ममान्तर्मध्ये स्थिता वर्तसे। बहिर्यदि वक्षः प्राप्नोषि ततो मम हृदयं स्मराशुगेभ्यो न बिभेतु। किं कृत्वा त्वन्मयसम्पुटे प्रविश्य अन्तर्बहिर्वर्तमानस्य दमयन्तीहृदयस्य मध्ये स्थितं हृदयसम्पुटमध्यवर्ति भवत्येव ॥११५॥

परिष्वजस्वानवकाशबाणता स्मरस्य लग्ने हृदयद्वयेऽस्तु नौ।
दृढा मम त्वत्कुचयोः कठोरयोरुरस्तटीयं परिचारिकोचिता ॥११६॥

हे प्रिये! परिष्वजस्व नौ आवयोर्लग्ने हृदयद्वये स्मरस्यानवकाशबाणताऽस्तु। इयं मम वक्षस्तटी तव कठोरयोः कुचयोर्दृढा स्थिरा परिचारिकोपासिका योग्या। कठोरयो-
-रुपासकः कठोर एवोचितः। तथा (यो) ऽस्य कठोरत्वं प्रसिद्धमेव। नोऽस्माकमिति वा पाठः। परिवारिकेति पाठे परिवारिका परिच्छदरूपेति स एवार्थः ॥११६॥

तवाधराय स्पृहयामि यन्मधुस्रवैः श्रवःसाक्षिकमाक्षिका गिरः।
अधित्यकासु स्तनयोस्तनोतु ते ममेन्दुलेखाभ्युदयाद्भुतं नखः ॥११७॥

तवाधरायाहं स्पृहयामि, यस्याधरस्य मधु यन्मधु, तस्य स्रवैः श्रवणैः कृत्वा तव गिरः श्रवःसाक्षिकमाक्षिकाः श्रवसी कर्णौ साक्षिणौ यस्य तच्छ्रवःसाक्षिकं एवंभूतं माक्षिकं क्षौद्रं यासां ताः श्रवःसाक्षिकमाक्षिका। तव गिरां माक्षिकमस्मदादीनां कर्णौ [141-a] यदुपपश्यतस्तत्र यस्याधरस्य श्रवणं हेतुः। तत्संनिधानात्त तासु मधुसङ्क्रान्तमस्तीत्यर्थः। आसु तव गीर्षु मध्वस्तीति अत्र कर्णौ साक्षीभूय वदतः तौ

च न कुचौ। इति व्यतिरेके विमृश्यमाने तवाधरादेवात्र मधुसंक्रान्तमित्यवगम्यते। प्रकारान्तरासम्भवात्। किञ्च। मम नखः ते स्तनयोरधित्यकासु उपरितनभूमिषु इन्दुलेखानामभ्युदयस्तस्याद्भुतमाश्चर्यं प्रथयतु। नख इति जातावेकवचनं प्राणिविवक्षया। नवेन्दुलेखाकर्तृत्वमात्रे तु व्यक्तिरस्त्येव। तवोच्चकुचयोरुपरितनपरिसरे स्थितस्ततो वर्तमानो मम नखश्चन्द्रलेखानामभ्युदयस्य विस्मयं करोत्वित्यर्थः। बह्वीनामिन्दुलेखानां युगपदभ्युदयोऽद्भुतम्। अधित्यकासु नवेन्दुलेखाभ्युदयो न सम्भवतीत्यद्भुतम्। तस्या (स्य) अभ्युदयो हि पश्चिमे नभसि वृद्धशशिलेखा त्वधित्यकासूदेति। तत्र च नैवाभ्युदयव्यवहारः। सामान्येन नखानखविन्यासवैदग्ध्यमात्रम्। अधित्यकोपादानात् स्तनयोरद्रित्वे आयाते तुङ्गत्वमायातम् ॥११७॥

न वर्तसे मन्मथनाटिका कथं प्रकाशरोमावलिसूत्रधारिणी।
तवाङ्गहारे रुचिमेति नायकः शिखामणिश्च द्विजराड्विदूषकः ॥११८॥

त्वं मन्मथप्रधाना नाटिका कथं न वर्तसे। अपि तु स्मरनाटिकैव त्वम्। नाटकभेदात् नाटिका। इदानीं नाटिकाधर्मः। कीदृशी? प्रकाशा रोमावलिरेव सूत्रधारिणी रङ्गाचार्यस्त्री यत्र सा। किञ्च। तवाङ्गहारे नृत्यविशेषे नायकः सभापतिः रुचिं दर्शनेच्छामुपैति। अतिप्रीत इत्यर्थः। तव विदूषको नर्मसुहृच्च द्विजराट् श्रेष्ठब्राह्मणरूपधारी। कीदृशः? शिखायां मणिर्यस्य स शिखामणिः, सरत्नचूल इत्यर्थः। इति छलेनार्थः। तत्त्वतस्तु त्वं मन्मथनाटिका कथं न वर्तसे। मन्मथं नाटयति। हर्षहेतुत्वात् मन्मथनाटिका। अपि तु त्वां प्राप्य दृष्ट्वा वा प्रमोदात् कामो नृत्यति। कीदृशी। प्रकाशं प्रकटं रोमावलेः सूत्ररेखां धारयतीति रोमावलिसूत्रधारिणी। अङ्गभोः तव हारे मुक्तासरे नायको मध्यमणिस्तरलाख्यो रुचिं कान्तिमेति। शिखायां वर्तमानो मणिश्च द्विजराजं चन्द्रं कान्तिमत्तया विदूषयतीति द्विजराड्विदूषकः। अत एव स्मरोल्लासजननम् ॥११८॥

गिरानुकम्पस्व दयस्व चुम्बनैः प्रसीद शुश्रूषयितुं मया कुचौ।
निशेव चान्द्रस्य करोत्करस्य यन्मम त्वमेकासि नलस्य जीवितम् ॥११९॥

हे प्रिये! गिरा कृत्वा मामनुकम्पस्वानुकम्पाविषयं कुरु। चुम्बनैः कृत्वा मम दयस्व दयां कुरु। मया प्रयोज्येन कर्त्रा कुचौ शुश्रूषयितुं प्रसीद। [१६१.७] यत्कारणात् मम नलस्य त्वमेवैका जीवितमसि। जीवितहेतुत्वात् जीवितम्। केव कस्य। चान्द्रस्य चन्द्रसंबन्धिनः करोत्करस्य ~~[illegible]~~ [1]निशेव। शशिकरनिकरस्य यथा रजनी जीवितं तथा त्वं ममेत्यर्थः ॥११९

1. ड. निवेशः

मुनिर्यथात्मानमथ प्रबोधवान् प्रकाशयन्तं स्वमसाववुध्यत।
अपि प्रपन्नां प्रकृतिं विलोक्य तामवाप्तसंस्कारतयासृजद्गिरः ॥१२०॥

अथ स नलः प्रबोधवान्[1] प्राप्तप्रबोधः सन्, स्वमात्मानं[-त्मा-] प्रकाशयन्तं प्रकटयन्तं बुबुधे। उद्भ्रमे गते सति तेन ज्ञातमहमात्मानं प्रकटयन्नस्मीति। तां प्रकृतिं पूर्वावस्थां प्रपन्नां प्राप्तामपि विलोक्यावाप्त संस्कारतया प्राप्तचैतन्यवासनः सन् गिरोऽसृजत्। यथायुक्तमुवाचेत्यर्थः। क इव ? मुनिरिव। यथा मुनिः प्रबोधवान् ज्ञानोत्कर्षयुक्तः सन् स्वमात्मानं प्रकाशयन्तं तेजोमयत्वात् समस्तमुद्योतयन्तं[2] जानाति। आत्मा हि प्रकाशमयः। तां प्रकृतिं सत्त्वरजस्तमसां साम्यावस्थां प्रपन्नां प्राप्तां विलोक्यापि इयं प्रकृतिरवान्तरैवात्मना सह सङ्गतास्तीति ज्ञात्वा अवाप्तसंस्कारतया प्राप्तगुणान्तराधानत्वेन गिरः सृजति। मुनिर्हि प्राप्तज्ञानत्वादात्मनः प्रकृतेश्च सम्यक्स्वरूपं ज्ञात्वा प्राप्तसंस्कारत्वेन नानाविधा वेदागमशास्त्ररूपा गिरः सृजति। प्रबोधो विद्यते यस्य स प्रबोधवान्। मुनिपक्षेऽर्थविशेषोऽन्योऽपि चिन्तनीयः ॥१२०॥

अये! मयात्मा किमनिह्नुतीकृतः किमत्र मन्ता[3] स तु मां शतक्रतुः।
पुरः स्वभक्त्याथ नमन्ह्रियाविलो विलोकिताहे न तदिङ्गितान्यपि ॥१२१॥

ता एव गिरो यथा। अये शून्ये संबोधने। मयात्मा किं प्रकटीकृतः, अपि त्वात्मानं प्रकटयता मया सर्वं विनाशितमित्यर्थः। अत्रार्थे स तु शतक्रतुर्मां किं मन्ता, कीदृशं ज्ञास्यति। अथवा स्वभक्त्या कृत्वा तस्याग्रे प्रह्वो भवन्, लज्जया कलुषीकृतस्तस्य शतक्रतोरिङ्गितान्यपि न विलोकयिताहे न द्रक्ष्यामि ॥१२१॥

स्वनाम यन्नाम मुधाभ्यधामहो महेन्द्रकार्यं महदेतदुज्झितम्।
हनूमदाद्यैर्यशसा मया पुनर्द्विषां हसैर्दूत्यपथः सितीकृतः ॥१२२॥

अहो निजं नाम निरर्थकमेव, यदहमभ्यु[4][-भ्य-]धामुक्तवानस्मि, एतन्महत्प्रभूतं महेन्द्रकार्यं नाशितम्। अर्थान्मया हनूमानाद्यो येषां ते हनूमदाद्यास्तैर्यशसा कृत्वा दूत्यपथो दूतकर्मणो मार्गो धवलितः, सितः कृतः, सितीकृतः। निजकर्मणः सम्यगनुष्ठितत्वात्। मया तु शत्रूणां हसैः सितीकृत इति संबन्धः। अत्र च स्वकर्मणो [140-a] विप्लावनं हेतुरस्त्येव। कवेरर्वाचीनत्वात् नलादनन्तरवर्तिनामपि हनूमदादीनामुपाख्यानानामुपादानम्। दूतत्वं च हनूमतो रामायणे प्रसिद्धम् ॥१२२॥

---

1. 𝔅. प्रबोधात्. 2. Bi. -मुद्द्योत- 3. Bi. मन्त्रा. 4. 𝔅. -भ्यु-.

धियात्मनस्तावदचारु नाचरं जनस्तु तद्वेद स यद्वदिष्यति ।

जनावनायोद्यमिनं जनार्दनं क्षये जगज्जीवपिबं शिवं वदन् ॥१२३॥

धिया कृत्वा तावद् विरुद्धं विसदृशं नाचरं नाचरितवानस्मि । तत्पुनर्जनो लोको वेद जानाति यत्किमपि स जनो वदिष्यति । किं कुर्वन्? जनावनाय लोकरक्षणायोद्यमिनं यत्नवन्तं विष्णुं जनार्दनं वदन् । क्षये कल्पान्ते जगतां जीवानां पिबं शोषकं शिवं वदन् । यो हि जनरक्षणजागरूकः स कथं जनानर्दयेत् । यश्च जगतां जीवानादत्ते स कथं शिवः सर्वेषां कल्याणकृद्भवेत् । अतो लोकोऽयं दुराराध्यो विपरीतदृष्टित्वात् । तत्त्वतस्तु जनानर्दयतीति जनार्दनः । इति काक्वा विपरीतलक्षणया सर्वथा जनरक्षक एव शिवस्तु भगवान् सामान्येन प्रशान्तत्वात् ॥१२३॥

स्फुटत्यदः किं हृदयं त्रपाभराद्यदस्य शुद्धिर्विबुधैर्विबुध्यताम् ।

विदन्तु ते तत्त्वमिदं त्वदन्तुरं जनानने कः करमर्पयिष्यति ॥१२४॥

इदं मम हृदयं लज्जाक्रमणात् किमिति विदीर्यते । यत्कारणादस्य हृदयस्य शुद्धि-निर्दोषता विबुधैः सर्ववेदिभिर्देवैर्विशेषेण बुध्यताम् । ते पुनस्ते विबुधा इदं तत्त्वं रहस्यमदन्तुरं निश्छिद्रं विदन्तु । अनुमतमेतत् परं लोकमुखे को हस्तं दास्यति । ते यथावृत्तमेतन्मे चेष्टितं ज्ञानदृष्ट्या पश्यन्तो जानन्तु । मम लोकस्त्वनिर्गलतया तत्त्वातत्त्वमविचारयन् स्थूलदृष्टित्वात् यत्तदेव प्रलपिष्यतीत्यर्थः ॥१२४॥

मम श्रमश्चेतनयानया फली बलीयसा लोपि च सैव वेधसा ।

न वस्तु दैवस्वरसाद्विनश्वरं सुरेश्वरोऽपि प्रतिकर्तुमीश्वरः ॥१२५॥

मम खेदस्तावदनया वर्तमानया चेतनया संविदा कृत्वा फली फलवान् बलवता विधिना पुनः सैव चेतना लुप्ता । संविदभावे च कथं साध्यसिद्धिः । युक्तोऽयमर्थः । दैवस्य स्वरसान्निजशगाद्यद्वस्तु विनश्वरं विनाशप्रकृति, तत्प्रतिकर्तुमन्यथाकर्तुं देव-देवोऽपि भगवान्न प्रभुः । किं पुनरस्मादृशो मनुष्यकीटः । प्रतीकारोऽत्र विनाशाद् रक्षणम् ॥१२५॥

इति स्वयं मोहमहोर्मिनिर्मितं प्रकाशनं शोचति नैषधे निजम् ।

तथा व्यथामग्नतदुद्दिधीर्षया दयालुरागात्लघु हेमहंसराट् ॥१२६॥

अथ कारुणिकः स्वर्णमरालपतिः लघु शीघ्रमागादागत इत्यत्र दिव्यत्वमेव हेतुः । कया? तथा तेन प्रकारेण व्यथायां मग्नस्य तस्य नलस्य [मग्नयोः] तयोर्वा

द्वयोरुद्धर्तुमिच्छ-[१०.७]-या। क्व सति। इति पूर्वोक्तरीत्या मोहस्य महत्यो या ऊर्मयो त्मङ्गर्यस्ताभिर्निर्मितं विरितं निजं प्रकाशनं प्रकटनं नले स्वयमेव शोचति सति। अति-
-दुःखसूचकश्चेष्टाविशेषः शोकः ॥१२६॥

नलं स तत्पक्षरवोर्ध्ववीक्षणं स एव पक्षीति भणन्नमभ्यधात्।

नयादयैनामति मा निराशतामसूञ्चिहातेयमतः परं परम् ॥१२७॥

तस्य पक्षाणां रवो[1]र्ध्ववीक्षणं, उपरिदर्शनं[2] नलं एषोऽयं मम परममित्रं, स एव पक्षी हंस इति भणन्न[मभ्यधात्। नयादयैनामतिमानिराशातौ][3] स्वन्तं स हंसोऽभ्यधात्। किमुवाचेत्याह। हे अदय! एनां निजप्रियामतिनिराशतां मा नय। अतः परं मे तस्मादप्य-
-नन्तरं परं[4] केवलमिथु(-य-)मसून् विहाता प्राणान् विहास्यति। विनिर्गता आशा नलप्राप्ति-
-स्पृहा यस्यास्तस्या भावो निराशता ताम् ॥१२७॥

सुरेषु पश्यन्निजसापराधतामियत्प्रयस्यापि तदर्थसिद्धये।

न कूटसाक्षीभवनोचितो भवान् सतां हि चेतःशुचितात्मसाक्षिका ॥१२८॥

हे राजन्! भवान् देवेषु विषये स्वस्य सदोषतां विमृशन् कूटसाक्षीभवनोचितो नासि। किं कृत्वा?। तत्कार्यनिष्पत्तये इयन्तं प्रयासं कृत्वाऽपि। कूटोऽविशुद्धः साक्षी यस्य स कूटसाक्षी। अकूटसाक्षिणः कूटसाक्षिणो भवनं, कूटसाक्षीभवनं तत्रोचितः। अत्रार्थे हि तव विशुद्धसाक्षी वर्तत एव। यतः सतां महात्मनां चेतसोऽन्तःकरणस्य शुचिता निर्दोषता सैवात्मनः साक्षिका[5] शुभाशुभोपदष्टी। अज्ञातः साक्षी साक्षिकः स्त्री चेत् साक्षिका ॥१२८॥

इतीरिणा पृच्छ्य नलं विदर्भजामपि प्रयातेन खगेन सान्त्वितः।

मृदुर्बभासे भगिनीं दमस्य स प्रणम्य चित्तेन हरित्पतीन्नृपः ॥१२९॥

स नृपो दमस्य भगिनीं भैमीं मृदुरकर्कशः सन्, बभाषे। कीदृशः?। खगेन हंसेन सान्त्वितः सौम्यरीत्या संबोधितः। कीदृशेन?। इति पूर्वोक्तमीरयत्युच्चरतीति इतीरितेन तथाभूतेन नलं भैमीमप्यापृच्छ्य प्रस्थानोचितां संविदं कृत्वा प्रयातेन प्रयातुमारब्धेन ॥१२९॥

देहेऽपि तुभ्यं कियतीः कदर्थनाः सुरेषु राजप्रसवावकेशिनीः।

अदम्भदूत्येन भजन्तु[6] वा दयां दिशन्तु वा दण्डमभी ममागसा ॥१३०॥

---

1. B1. वेगो- (interlinear). 2. B1 -दर्शनं. 3. D. -मभ्यधात्---शातौ.
4. B1. om. परं. 5. B1. om साक्षिका. 6. B1. भवन्तु.

हे प्रिये ! तुभ्यमपि कियतीरनेकाः कदर्थना ददे, अपि त्वयोऽप्यनन्तरं त्वां[1] न व्यथयिष्यामि। कीदृशीः ? । देवेषु विषये रागः प्रेमरस एव प्रसवः फलं तत्तावकेशिनीर्वंध्याः । एवं स्थिते अमी सुरा मम निर्व्याजदूतकर्मणा करुणां वा कुर्वन्तु । आगसाऽपराधेन वा कृत्वा दण्डं वा दिशन्तु , निग्रहं वा कुर्वन्तु ॥१३०॥

अयोगजामन्वभवं न वेदनां[2] हिताय मेऽभूदि-[११.७]-यमनुयमुन्मदिष्णुता ।
उदेति दोषादपि दोषलाघवं कृशत्वमज्ञानवशादिवैनसः ॥१३१॥

इयमुन्मदिष्णुता उन्मादितृता मम हिताया भूदुपकाराय सम्पन्ना । यतः अहमेतत्प्रभावाद् विरहकृतां पीडां नानुभूतवानस्मि । ननून्मादो दोषो, वेदनापि दोषस्तत्कथं दोषाद् दोषनाश इत्याह । दोषादपि दोषस्य लाघवमल्पीयस्त्वमुदेति न परं गुणादेव । कस्येव कस्मादित्याह। अज्ञानवशादेनस इव । अबुद्धिपूर्वकरणात् पापस्य लाघवं लोके शास्त्रे च प्रसिद्धमेव । अज्ञानमपि दोषः पातकं दोष एव ॥१३१॥

तवेत्ययोगस्मरपावकोऽपि मे कदर्थनात्यर्थसयागमद्याम् ।
प्रकाशमुन्माध यदध कारयन्मयात्मनो मामनुकम्पते स्म सः ॥१३२॥

वा अथवा वियोगकामाग्निरपि कदर्थनाया अत्यर्थतया भृशतया कृत्वा दयामगमत्, दयामकरोत् । यतः सोऽयोगस्मरपावको मामनुकम्पते स्म, दयया ददर्श । किं कुर्वन् ? । मामुन्मादोद्भ्रान्तं कृत्वा मयैव प्रकाशयन् प्रकरं कारयन् । कस्य ? आत्मनः स्वस्येत्या--त्मा वियोगस्मरपावकस्यैव । मया ह्यनुमत्तत्वेन स्वात्मनेव स्वात्मा वियोगस्मरपावकस्य प्रकटितः ॥१३२॥

अमी समीहैकपरास्तवामराः स्वकिंकरं मामपि कर्तुमीशिषे ।
विचार्य कार्यं सृज मा विधान्मुधा कृतानुतापस्त्वयि पार्ष्णिविग्रहम् ॥१३३॥

हे प्रिये ! अमी अमरास्तव समीहैकपरा इच्छैकनिष्ठाः मामपि स्वदासीकर्तुं शक्तासि । अहमपि त्वदिच्छुरस्मीत्यर्थः । तस्मात् कार्यं विमृश्य कुरु मुधा कृतस्य वृथा, विहितस्यानु--तापः पश्चात् तापस्त्वयि विषये पार्ष्णिविग्रहं मा विधान्, मा कार्षीत् । पार्ष्णिः पाश्चात्यो राजा, तस्येव विग्रहः पृष्ठघातः । यथा जिगीषुं नृपान्तरं विग्रहासक्तं पार्ष्णिर्नाम राजा विगृह्णाति तथा त्वामन्यतरासक्तां[3] भ्रान्तिकृत पश्चात्तापो मा विग्रहीदित्यर्थः[4] ॥१३३॥

उदासितेनैव [5]मयेदमुच्यसे भिया न तेभ्यः स्मरतानवान्न वा ।
हितं यदि स्यान्मदसुव्ययेन ते तदा तव प्रेमणि शुद्धिलब्धये ॥१३४॥

---

1. B. त्वं . 2. B1, B. वेदनं . 3. B. —शक्ती. 4. B. विगृही —5. B1 मयैवम्
B. —उद्यसे .

हे प्रिये ! मयोद्यमितेनोदासीनेनैवेदं हिस्वरूपमुच्यसे न तेभ्यः सुरेभ्यो भिया न वा स्मरतानवात् कामाल्लघीयस्त्वात्, नाहं तेभ्यो बिभेमि, न च त्वयि मन्दानुरागः। अपि तु मध्यभावेनैवं कथ्यमानमस्ति। यतः यदि ममासुव्ययेन प्राणनाशेन मरणेन कृत्वा तव हितं स्यात् तदा तव प्रेमणि स्नेहग्रन्थौ अहं शुद्धिलब्धये शुद्धिं करोमि। शुद्धिलब्धिं करोति, शुद्धिलब्धयति। पश्चाद् वर्तमानाया आत्मनेपदोत्तमैकवचनम् ॥१३४॥

इतीदृशैर्नैषधसूनृतामृतैर्विदर्भज-[191.b]-न्मा भृशमुल्ललास सा।
ऋतोरधिश्रीः शिशिरानुजन्मनः पिकस्वरैर्दूरविकस्वरैर्यथा ॥१३५॥

इत्यदृभिरेतादृशैर्नलप्रियवचःपीयूषैः सा दमयन्ती भृशमुल्लसिता, हृष्टा जातेत्यर्थः। शिशिरादनुपश्चाज्जन्म यस्य तस्य ऋतोर्वसन्तस्याधिश्रीस्तरुणलक्ष्मीर्दूरविकस्वरैः कोकिलकूजितैरधिकविकासिभिः कलकण्ठशब्दैः कृत्वा यथा समुल्लसति ॥१३५॥

नलं तदावेत्य तमाशये निजे घृणां विगानं च मुमोच भीमजा।
जुगुप्समाना हि मनो धृतं तया सती धिया दैवतदूतधावि सा ॥१३६॥

भीमजा तदा तं दूतरूपं नलमवेत्य ज्ञात्वा निजे चित्ते घृणां जुगुप्सां विगानं निन्दां चामुञ्चत्। हि यस्मात् तदा तस्मिन् पूर्वोक्ते काले सा सती पतिव्रता दैवतदूत-धावि मनो धिया कृत्वा धृतं स्तम्भितं जुगुप्समाना स्थितेत्यध्याहारः। नलरूपे दैवतदूते बलाद्वलमानं चित्तं सतीभावात् बुद्ध्या निगृह्य जुगुप्समाना पूर्वं स्थिता इदानीं च तदेव दूतं नलमेवं विनिश्चित्य मनसि वर्तमाने घृणाविगाने तत्याजेत्यर्थः। घृणाविगानयोर्विषयस्तदात्मैव ॥१३६॥

[1]मनोजने! ते भविता मनः पिता निमज्जयन्नेनसि तन्न लज्जसे।
[2]अमुद्रि सत्पुत्रकथा त्वयेति सा स्थिता सती मन्मथनिन्दिनी धिया ॥१३७॥

किञ्च सा सती इत्येवं धिया कृत्वा मन्मथनिन्दिनी स्थिता। इति कथं तदाह। हे मनोजने! मनोजन्मन् ते तव पिता जनको भविता जन्मवतां मनस्वितां तन्मनो निजपितरमेनसि पापे निमज्जयन् सन् लज्जसे न, अपि त्वेवं कुर्वतस्तव महती लज्जा कर्तुं युक्ता। अथवा सत्पुत्रस्य कथा वार्ताऽपि त्वया मुद्रिता नियमिता। [3]सत्पुत्रा हि पापे निमज्जन्तं पितरमुद्धरन्ति, न तु त्वमिव निमज्जयन्ति। मनसो जनिर्जन्म यस्येति मनोजनिस्तस्य सम्बोधनम् ॥१३७॥

---

1. B1 मनोभुवस्ते. 2. B1. अनुद्रि. 3. B1 om. सत्पुत्रा ---- त्वमिव

प्रसूनमित्येव तदङ्गवर्णना न सा विशेषात्कतमत्तदित्यभूत् ।
तदा कदम्बं तदवर्णि लोमभिर्मुदश्रुणा प्रावृषि हर्षमागतैः ॥१३८॥

तस्या अङ्गस्य वर्णना प्रशंसा पूर्वं सामान्येन प्रसूनमित्येवाभूत् । कतमत्[1] प्रकृष्टं किंचत् पुष्पमिति विशेषो नाभूत् । तदा तत्पुष्पं कदम्बमवर्णि । कैः लोमभिः ? कीदृशैः ? । मुदश्रुणा हर्षजनयनजलेन कृत्वा या प्रावृट्, तस्यां हर्षप्राप्तैः । प्रावृषि कदम्बकुसुमानि प्रायेण प्रादुर्भवन्ति । तदङ्गस्य तु हर्षजैर्लोमभिः कृत्वा कदम्बत्वम् । अश्रुण इति षष्ठी वा ॥१३८॥

मयैव संबोध्य नलं व्यलापि यत्स्वमाह मद्बुद्धिमिदं विमृश्य तत् ।
असाविति भ्रान्तिमसाद्दमस्वसुः स्वभाषितस्वोद्भ्रमविभ्रमक्रमः ॥१३९॥

असौ नलः स्वभाषितस्वोद्भ्रमविभ्रम-[192 a]-क्रमः सन् दमस्वसुरिति भ्रान्ति-मेवंरूपं सन्देहमसात् स्यति स्म । इति कथमित्याह । मयैव नलं सम्बोध्य यद् विलपितं तदिदं विमृश्य स्वमात्मानमुद्बुद्धमाह । मया ज्ञातं ब्रवीतीति स्वेनात्मनैव भाषितः स्वोद्भ्रमविभ्रमस्य निजापस्मारचेष्टितविलसितस्य क्रमो येन स तथा । यद्ययमात्मानं मया ज्ञातमज्ञास्यत्तदा नैवं स्वेन स्वप्रकाशनमशोचिष्यदिति । तथा[2] निश्चितमित्यर्थः ॥१३९॥

विदर्भराजप्रभवा ततः परं त्रपासखी वक्तुमलं न सा नलम् ।
पुरस्तमूचेऽभिमुखं यदत्रपा ममज्ज तेनैव महाह्रदे ह्रियः ॥१४०॥

ततोऽनन्तरं सा भैमी लज्जासहचरीरिका सती नलं वक्तुं नालं, न समर्था । पुरोऽग्रे, पूर्वं वा तं नलमभिमुखं सन्तं यदत्रपा निर्लज्जा सती वक्ति स्म, तेनैव कृत्वा ह्रियस्त्रपाया महाह्रदे मग्ना । ह्रदोपादानाद् ह्रियो नदीत्वमायातम् ॥१४०॥

यदापवार्यापि न दातुमुत्तरं शशाक सख्याः श्रवसि प्रियाय[3] सा ।
विहस्य सख्येव तमब्रवीत्तदा ह्रियाऽधुना मौनधना भवत्प्रिया ॥१४१॥

सा भैमी सख्याः श्रवसि कर्णे अपवार्यापि अन्तर्धायापि यदा प्रियायोत्तरं दातुं न शशाक । तदा सखीव यस्यैव विहस्य तमब्रवीत् । किमब्रवीदित्याह । हे सुभग ! अधुना भवत्प्रिया ह्रिया कृत्वा मौनधनाऽस्ति । धनं हि गृहीत्वा यत्नेन रक्ष्यते, तद्रूपत्वात् मौनस्य धनत्वम् ॥१४१॥

---

1. अ. किं तत्. 2. अ. ज्ञातज्ञायस्य. 3. B. प्रिया ह्रिया.

पदातिथेयाङ्क्लिखितस्य ते स्वयं वितन्वती लोचननिर्झरानियम् ।
जगाद यां सैव मुखान्मम त्वया प्रसूनबाणोपनिषन्निशम्यताम् ॥१४२॥

हे सुभग ! इयं तव प्रिया स्वयमात्मनैव लिखितस्य चित्रविषयीकृतस्य तव निजलोचननिर्झरानश्रुप्रवाहान् पदातिथेयान् चरणोपगतान् वितन्वती सती यां जगाद सैव प्रसूनबाणोपनिषत्,* स्मररहस्यविधा मम मुखाद् भवता श्रूयताम् ॥१४२॥

असंशयं स त्वयि हंस एव मां शशंस न त्वद्विरहाप्तसंशयाम् ।
क्व चन्द्रवंशस्य वतंस ! मद्वधान्नृशंसता सम्भविनी भवादृशे ॥१४३॥

हे प्रिय ! नूनं स हंस एव मां त्वद्विरहाप्तसंशयां सतीं न शशंस । भो राजन् ! सा राजपुत्री तव विरहेण प्राप्तसन्देहास्तीति नूनं तेन हंसेन दूतीभूयावयोः सन्धिं योजयता तुभ्यं न निवेदितम् । यतः भोश्चन्द्रवंशस्य वतंस ! परमाभरण मम वधात् भवादृशे पुरुषरत्ने नृशंसता घातुकता क्व सम्भविनी ? अपि तु नैव सम्भवति । त्वं ममात्मशरणां जानन्नेव जीवसन्देहं प्राप्तां कदाचिन्नोपेक्षसे पापभीरु-
-स्त्वमित्यर्थः ॥१४३॥

जितस्त्वयास्येन विधुः स्मरः श्रिया कृतप्रतिज्ञौ मम तौ वधे कुतः ।
तवेति कृत्वा यदि तज्जितं मया न मोघसंकल्पधराः [।१२-६]-
किलामराः ॥१४४॥

भोः प्रिय ! त्वया आस्येन मुखेन कृत्वा विधुर्जितः श्रिया तनुकान्त्या स्मरो जितः । मम वधे तौ विधुस्मरौ कुतो हेतोः कृतप्रतिज्ञौ । 'आवामवश्यं दमयन्तीं हनिष्याव' इति कृता प्रतिज्ञा निश्चयो याभ्यां तौ तथा । यस्य किल विजेता यः स तस्य वधे प्रतिज्ञां कुरुते-यथा महाभारतेऽभिमन्युनाम्नि प्रिये पुत्रे जय-
-द्रथेन निहते, पार्थस्तद्वधे प्रतिज्ञाशतमकार्षीत् । यदि तवेति कृत्वा कृतप्रतिज्ञौ मद्वधे तर्हि मया जितम् । 'आवां नलं हन्तुं न शक्तौ नलसंबन्धिनीं दमयन्तीं हन्व' इति यदि बुद्ध्या यदि [ मां पीडयतः ] तर्हि धन्याऽहम् । किलागमश्रवण-
-हेतोः अमरा देवाः मोघसङ्कल्पधरा न भवन्ति । देवानां चिन्तितं सत्यमेव भवति । तस्मादहं त्वत्संबन्धिनी भविष्याम्येव ॥१४४॥

निजांशुनिर्दग्धमदङ्गभस्मभिर्मुधा विधुर्वाञ्छति लाञ्छनोन्मृजाम् ।
त्वदास्यतां यास्यति तावतापि किं वधूवधेनैव पुनः कलङ्कितः ॥१४५॥

निजैरंशुभिः कृत्वा निर्दग्धं यन्ममाङ्गं तस्य भस्मभिः कृत्वा वृथैव विधुर्लाञ्छ-
-नोन्मृजां स्वकलङ्कोत्पुंसनं वाञ्छति । तावतापि किं विधुर्वधूभस्मलाञ्छनोन्मार्जन-

~~-लक्षेणापि~~ -लक्षणेनापि कर्मणा किं भवन्मुखत्वं यास्यति, अपि तु नैव। यतः कीदृशः? वधूवधेनैव स्त्रीघातपातकेनैव पुनः कलङ्कितः। भूयोऽपि भूयस्तया जात-कलङ्कः। अत्र तत्त्वतः कलङ्कोऽपवादः। तद्वशाद् देहेऽपि कालिमा भवति तदेव लाञ्छनम् ॥१७५॥

प्रसीद यच्छ स्वशरान्मनोभुवे स हन्तु मां तैर्धुतकौसुमाशुगः।

त्वदेकचित्ताहमसून् विमुञ्चती त्वमेव भूत्वा तृणवज्जयामि तम् ॥१७६॥

प्रसादं कुरु निजबाणान् कामाय देहि स कामस्त्यक्तपौष्पशरः सन् तैस्तव शरैर्मां हन्तु। नन्वेवं तव मरणं भविष्यतीत्याह। अहं त्वदेकचित्ता भूत्वा प्राणान् त्यजन्ती सती, त्वमेव भूत्वा भवत्स्वरूपतां प्राप्यैव तृणवत् हेलयैव तं जयामि। त्वय्येक-मद्वितीयं चित्तं यस्याः सा तथा। यः किल यदेकचित्तो भूत्वा प्राणान् विमुञ्चति स एव भवतीति ॥१७६॥

श्रुतिः सुराणां गुणगायनी यदि त्वदङ्घ्रिमग्नस्य जनस्य किं ततः।

स्तवे रवेरप्सु कृताप्लवैः कृते न मुद्वती जातु भवेत्कुमुद्वती ॥१७७॥

ननु येषां महिमा वेदेऽपि गीयते तेऽपि देवास्त्वां कामयन्ते तांस्त्यक्त्वा विहाय नले मनुष्ये किमित्येवमनुरज्यस इत्याशङ्क्याह। यदि श्रुतिः सुराणां गुण गायनी तर्हि ततस्तथाविधात् कर्मणो मम किमायातम्। यतः अप्सु विषये कृताप्लवैः कर्तुमारब्ध-स्नानैः पुरुषैः सूर्यस्य स्तवे कृते सति कुमुद्वती कैरविणी कदाचिदपि मुद्वती प्रीतिमती न भवेत्। चन्द्रगत-[193.a]-मनस्कत्वादिति गम्यम्। स्तोत्रकर्तृभिः सह तदा जले कुमुदिन्याः सांनिध्यं वर्तत एव दमयन्त्याश्च श्रुतिपाठकैर्निजपितुर्वेश्मनि ॥१७७॥

कथासु शिष्ये वरमद्य न ध्रिये ममावगन्तासि न भावमन्यथा।

त्वदर्थमुक्तासुतया सुनाथ! मां प्रतीहि जीवाभ्यधिके! त्वदेकिकाम् ॥१७८॥

अद्याहं [1] वरं भव्यं कथासु शिष्ये प्रियेणावतिष्ठेन जीवामीत्यर्थः। यतः अन्यथा मरणं विना त्वं मम भावमाशयं नावगन्तासि, नावगमिष्यसि, न ज्ञास्यसीत्यर्थः। हे सुनाथ! शोभनस्वामिन्! त्वदर्थमुक्तासुतया कृत्वा मां जीवाभ्यधिक त्वदेकिकां प्रतीहि निश्चिनु। त्वदर्थं भवन्निमित्तं मुक्ता असवो यया तस्या भावस्तत्ता तया। जीवादभ्यधिक-स्त्वमेवैको यस्याः सा तथा ताम्। त्वदर्थं चेज्जीवभूता असवस्त्यक्तास्तर्हि युक्त एव त्वं जीवादधिकः। अन्योऽपि सुनाथः सङ्ग्रामादौ निजार्थं जीवमुत्सृजन्तं सेवकं जीवाभ्यधिक-त्वम् -स्वात्मकं जानाति ॥१७८॥

1. B1. om. वरं ---- प्रियेन -

महेन्द्रहेतेरपि रक्षणं भयाद्यदर्थिसाधारणमस्त्रभृद्व्रतम् ।
न सून[1]बाणादगतोऽपि मामवन् क्षतं तदुच्चैरवकीर्णिनस्तव ॥१४९॥

हे नाथ ! यत्त्वार्थिसाधारणं याचकमात्रसामान्यमस्त्रभृद्व्रतमस्ति । किं तदित्याह । महेन्द्र-हेतेरपि वज्रादपि रक्षणम् । त्वं शरणागतान् सामान्येन वज्रभयादपि नियमेन रक्षसीति । शस्त्रभृतां क्षत्रियाणां यद् व्रतं तत् सूनबाणात् पुष्पशरादपि मां निजचरणशरणं नावन्न रक्षन् सन् क्षतं, न नष्टं, अपि तु क्षतमेव । अत एव तवावकीर्णिनः क्षतव्रतस्य अव-कीर्णिन इत्यनेनैव क्षतव्रतत्वे व्रतं क्षतमित्यनेन वाऽवकीर्णित्वे लब्धे यद् द्वयोरुपादानं तदान्तरभेदभङ्गिवशात् । महेन्द्रस्य हेतिर्वज्रम् । सूनाशुगस्य बाणश्च सूनमेवेति द्वयोः साभिप्राय[2]तायां मद्दन्तरमाह ॥१४९॥

तवास्मि मां घातुकमप्युपेक्षसे मृषामरं हाऽमरगौरवात् स्मरम् ।
अवेहि चण्डालमनङ्गमङ्ग[3] ! तं स्वकाण्डकारस्य मधोः सखा हि सः ॥१५०॥

हे प्रिय ! अहं तवास्मि नान्येन सह संबन्धः । अतः हा कष्टं मृषा मिथ्यैवामरं मां घातुकमपि स्मरममरगौरवात् सत्यामरमहत्त्वात् किमुपेक्षसे । यद्ययं हि तात्त्विकोऽमरो भवेत् तदा मामीदृगवस्थां स्त्रियं न हन्यात् । अमरः सन् स्मरणीय-श्च न भवेदिति मिथ्याऽमरत्वे हेतुद्वयम् । तर्हि तत्त्वतः कोऽयमित्याह । अङ्ग भोः तमनङ्गमङ्गरहितं छिन्नाङ्गं चण्डालमवेहि । हि यस्मात् स्वकाण्डकारस्य निजबाण-निर्मातुरन्त्यजजातेर्मधुरित्यनाम्नः सखा मित्रम् । चण्डालो हि छिन्नाङ्गुल्याद्यङ्गो भवति । मधुनाम्नः स्वकाण्डकारस्य च सखा । अन्त्यजा-[193.b]-नां च नामानि प्रायेण दैत्यराक्षसादीनामेव भवन्ति । यथा ब्रह्मणादीनाम् । तत्त्वतस्त्वनङ्गत्वं तस्य प्रसिद्धमेव । मधुर्वसन्तश्च तस्य काण्डानां कुसुमानां कर्ता मित्रमिव[4] स्वकाण्डकारेण सखित्वेन तस्य तेन सार्धं खादनपानादिसंसर्गो गम्यते । काण्डकारजातिश्च चण्डालजातेरपि हीयते ॥१५०॥

लघौ लघावेव पुरः परे बुधैर्विधेयमुत्तेजनमात्मतेजसः ।
तृणे तृणेहि ज्वलनः खलु ज्वलन् क्रमात् करीषद्रुमकाण्डमण्डलम् ॥१५१॥

ननु चेदयमीदृशश्चण्डालस्तर्हि मम शक्तिमद्भिर्वैरिवधार्हस्यास्य वधो न कीर्तिकृदित्याह । बुधैर्नीतिविद्भिः पुरः प्रथमं लघौ लघावेव परे शत्रौ आत्मतेजसो निजप्रतापस्योत्तेजनं तीक्ष्णीकरणं कार्यम् । लघुलघुक्रमेण प्रथमं नीतिविदा शत्रवः[5] साधनीया (व्या) इत्यर्थः ।

1. B1, 8 —बाणाशु— 2. B1, 8 om. —याँ. 3. B1, 8. अनङ्गतां. 4. 8. —मेव. 5. B1 शपथः

तथाहि – ज्वलनो वह्निस्तृणे शुष्ककाशादौ दीप्यमानः सन् क्रमाच्छनैः करीषद्रुमकाण्ड-मण्डलं तृणेहि हिनस्ति। तृणं तावल्लघीयः तदपेक्षया करीषं लघु। द्रुमकाण्डानां वृक्षप्रतिशाखानां प्रतिमण्डलं तु ततो महीय एवं नीतिविदापि प्रथमं लघुतरे ततो लघौ ततोऽपि ततो महति विद्विषि विग्रहारम्भ एवं विधेयः ॥१५१॥

सुरापराधस्तव वा कियानयं स्वयंवरायामनुकम्प्रता मयि।
गिरापि वक्ष्यन्ति मखेषु तर्पणादिदं न देवा मुखलज्जयैव ते ॥१५२॥

ननु त्वयि देवैः काम्यमानायां कामतः प्रवर्तमानोऽहं तेषामपराधी स्यामित्याह। अथवा तव क्रियमाणोऽयं देवानामपराधः। अयं क इत्याह। मयि पतिंवरायां कन्यया-मनुकम्प्रता दयालुता। किञ्च। मखेषु बहुषु यज्ञेषु यत् तर्पणं, त्वत्कृतं प्रीणनं, तस्मात् ते तव मुखस्य लज्जयैव इदं सर्वं गिरापि न वक्ष्यन्ति। कर्तव्यं तावत् तत्रैव तिष्ठतु वचसापि तवेदं दूषणं नोच्चरिष्यन्तीत्यर्थः। अन्योऽपि ब्राह्मणादिर्भोज्यादौ केनापि पायस-घृतखण्डादिना सन्तर्पितः सन् तस्य सापराधस्यापि मुखदाक्षिण्येनैव किमपि दूषणं न वक्ति, अपि तु भव्यं भव्यमिति कथयति। अनुकम्प्रेति पाठे अनुकामता ॥१५२॥

व्रजन्तु ते तेऽपि वरं स्वयंवरं प्रसाद्य तानेव मया वरिष्यसे।
न सर्वथा तानपि न स्पृशेद्दया न तेऽपि तावन्मदनस्त्वमेव वा ॥१५३॥

ते तेऽपि देवा अन्येऽपि राजानो वरं भव्यं व्रजन्तु। को दोषः स्वयंवरमुद्दिश्य सर्वे-ऽप्यायान्तु, तानेव प्रसन्नान् कृत्वा मया त्वमेव वरिष्यसे। ननु कथं ते तव प्रसन्ना भविष्यन्तीत्याह। सर्वेण प्रकारेण तानपि दया न स्पृशेत्। अपि तु नाम तान् दया स्पृशेदेव। कथमेवं भवत्या [194-a] निश्चितमित्याह। तेऽपि देवादयस्तावन्मदनो न भवति। वाऽथवा त्वं त्वमेव न भवसि। अपि तु ते भवद्भ्यामन्य एव। मदनं त्वां च न परं दया स्पृशति तानवश्यं स्पृशति। ते इत्यनूद्य मदनस्त्वमिति च द्वयं विधेयम्। अनयोरनूद्यत्वे तेषां विधेयत्वेऽपि च सति कापि नार्थक्षतिः। तेऽपि मदनो न भवन्ति, त्वं वा न भवन्तीति च तदा योजना ॥१५३॥

इतीयमालेख्यगतेऽपि वीक्षिते त्वयि स्मरव्रीडसमस्ययानया।
पदे पदे मौनमयान्तरीपिणी प्रवर्तिता सारघसारसारणी ॥१५४॥

अनया भैम्या त्वयि चित्रस्थेऽपि दृष्टे स्मरश्च व्रीडश्च स्मरव्रीडौ तयोः समस्यया समास-रूपया सत्या इतीयं सारघं मधु, तस्य सारः स्थिरांशस्तस्य सारणीव सारणी कुल्या प्रवर्तिता प्रवाहिता।

कीदृशी? पदे पदे स्थाने स्थाने तत्त्वतस्तु प्रतिवर्णसमुदायं मौनमयमन्तरीयं द्वीपं विद्यते यस्यां सा तथा। स्मरव्रीडयोः समस्या द्वयोः साम्येन मिलितत्वात्। पदार्थद्वयपूरणं हि समस्या ॥१५४॥

चण्डालस्ते विषमविशिखः स्पृश्यते दृश्यते न
ख्यातोऽनङ्गस्त्वयि जयभियः किन्तु कृत्ताङ्गुलीकः।
कृत्वा मित्रं मधुमधिवन[1]स्थानमन्तश्चरित्वा
सख्याः प्राणान् हरति हरितस्त्वद्यशस्तज्जुषन्ताम् ॥१५५॥

हे सुभग! ते चण्डालो विषमविशिखो विषमबाणकः सख्यास्तव प्रियायाः प्राणान् अहरति मुष्णाति ~~स्त्व~~ तत्तव यशो हरितो दिशो जुषन्तां श्रयन्तु। किं कृत्वा हरतीत्याह। अधिवनं, वने वर्तमानं मधुं मधुदैत्यनामानं कञ्चन चौरं [2]मित्रं कृत्वा तत्साहायकबलेने-त्यर्थः। किञ्च। अन्तर्मध्ये चरित्वा हेरकव्यापारं कृत्वा। अन्तर्मध्यं वा चरित्वा। चौरो हि प्रथमं कार्पटिकादिवेषेणान्तर्नगरादिमध्यं चरति। तदनु शनैः प्रविश्य प्रधानभूतं वस्तु हरति। देहान्तस्य प्राणा एव सारभूताः। ननु कथं विषमविशिखत्वादेव चण्डालत्वमस्ये-त्यन्यथयत्याह। यतोऽयं न [3]स्पृश्यते, न दृश्यते। चण्डालस्य हि स्पर्शनं दर्शनं च दूरत एव वर्ज्यम्। किञ्च। नु सम्भावयामि। त्वयि विषये जयभयात् कृत्ताङ्गुलीकः सन्ननङ्ग इति प्रसिद्धः। चण्डालो हि प्रभोर्जयभयेन स्वस्याङ्गुलीं कर्णं वा छित्वा, तस्मै सम्यगुपायनीकरोति। ततः प्रभृति तस्यैवाङ्गुलिकश्चण्डालः कथ्यते, छिन्नाङ्गुलित्वादनङ्ग-नाम्नैव च प्रतीयते। चण्डालत्वहेतुभूतं कृत्वा मित्रं मधुमधिवनमित्यादिविशेषणजात-मप्यत्रावगन्तव्यम्। तत्त्वतस्तु विषमविशिखः पञ्चबाणः। अस्पर्शनदर्शने त्वमूर्तत्वात्। अनङ्गता प्रसिद्धहेतुरेव। वनान्तर्वर्तमानेन मधुना चैत्रेण मैत्री चास्य कविसमयाश्रया। अन्तश्चित्ते चरणं प्रा-[194-b]-णानां हरणं चानुभवसिद्धम्। हरणं बलात् स्थानान्तर-नयनं वा ॥१५५॥

अथ भीमभुवैव रहोऽभिहितां नतमौलिरपत्रपया स जगाम।
अमरैः सह राजसमाजगतिं जगतीपतिरभ्युपगत्य ययौ ॥१५६॥

अथ स जगतीपती *राजा ~~ययौ~~ देवानां समीपं जगाम। किं कृत्वा देवैः सार्धं निजां राजसमूहे स्वयंवरस्थाने [4]मिलिते गतिं गमनमभ्युपगत्याङ्गीकृत्य। कीदृशीम्? भीम-भुवा दमयन्त्यैव मन्त्रभेदभयात् रह एकान्तेऽभिहितां षट्कर्णो हि मन्त्रो भिद्यतेऽतः प्रियसख्यपि तत्र बहिष्कृता। निजकृतधर्मकर्मणो वैसदृश्यात् त्रपयाऽवनतमौलिः ॥१५६॥

---

1. B- -जव- 2. B1 मैत्रं- 3. B1, B- स्पृशते- ~~[illegible]~~ * राजादयो- B1, B.
4. B1, B- मिलितं- correct- राजा ययौ,

तदखिलमिह भूतं भूतगत्या जगत्याः
पतिरभिलपति स्म स्वात्मदूतत्वतत्त्वम् ।
त्रिभुवनजनयाबद्वृत्तवृत्तान्तसाक्षा–
–त्कृतिकृतिषु निरस्तानन्दमिन्द्रादिषु द्राक् ॥१५७॥

जगत्याः पतिर्नलस्तत्पूर्वोक्तं भैमीसमीपे भूतं जातं स्वात्मदूतत्वस्य तत्त्वं परमार्थभूतगत्या वृत्तप्रकारेण निरस्तानन्दमकुलकार्यत्वाद् गतहर्षं यथास्यादेवं द्राक् झगिति इन्द्रादिषु विषयेऽभिलपति स्म। कीदृशेषु ? । त्रिभुवनस्य ये जना देवनरनाग–
–नरसेर्या यावत् समस्तं यद्वृत्तमाचरितं,[1] तस्य यो वृत्तान्तो वार्ता तस्य साक्षात्कृतिः प्रत्यक्षीकरणं, तत्र कृतिनः कुशलास्तेष्विति नलवृत्तान्तज्ञानसूचनम् ॥१५७॥

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
[2] सँदृब्धार्णववर्णनस्य नवमस्तस्य व्यरंसीन्महा–
–काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥१५८॥

सँदृब्धं गुम्फितमर्णववर्णनं नाम प्रकरणं येन स तथा तस्येति शुभम् ॥१५८॥

शाण्डिल्यनाममुनिवंशकरीरकस्य
श्रीवीरधीरतनयस्य गदाधरस्य ।
कॢप्तौ सुधासधुनि नैषधटीकिकायाँ
सर्गोऽयमत्र नवमः परिपूर्यते स्म ॥१॥ ९॥
–पूर्यते

[3] शुभं भवतु । श्रीसङ्घाय मङ्गलमस्तु । शिवमस्तु । कल्याणं भूयात् । इति श्रीनैषधकाव्ये गदाधरीटीकायाँ नवमः सर्ग सम्पूर्णतामबीभजत् ॥९॥

---

1. B1. *repeats* तस्य यो वृत्तान्तो ----- नलवृत्तान्त –
2. S. सँदृप्ता –
3. S. *om.* शुभं --- भूयात् –